खुदीरामः बोझः



श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम् - गुजरातम्

।। खुदीरामः बोझः ।।

प्रेरणास्रोतांसि एवं मार्गदर्शकाः

श्रीकुलपतिवर्याः

प्रॉ. पङ्कज एल. जानीजीमहाभागाः

लेखकः

के. पी. महेता

अनुवादकौ

प्रा. ललितः पटेलः

श्री गोपाल उपाध्यायः

प्रकाशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५३२,३३ फेक्स : २४४४१७

www.shreesomnathsanskrituniversity.org

प्रकाशकः -

डॉ. विष्णुः पुरोहितः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

परामर्शनसमितिः -

डॉ. नरेन्द्रकुमार पण्ड्या

डॉ. देवेन्द्रनाथः पाण्डेयः

डॉ. भावप्रकाशः गांधी

डॉ. शत्रुघ्न पाणिग्राही

कार्यसंयोजकः -

श्री दशरथः जादवः

(उपकुलसचिवः)

प्रथमं संस्करणम् - जनवरी, २०११

प्रतयः - ५००

मूल्यम् - ५०/-

मुद्रकः -

एच. के ओफसेट, वेरावलम्

।। शुभाशंसनम् ।।

विद्यायाः प्रकाशनम् बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने–जने करोति। अत एवोक्तम् ''पुस्तकी भवति पण्डितः''। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे **'स्वर्णिमगुजरातजयन्ती'**- अवसरे तथा बेङ्गलूरुनगरे आयोजितायां **'विश्वसंस्कृतपुस्तकमेलायां'** श्रीसोमनाथसंस्कृतविश्वविद्यालयः गुजरातराज्यगांधीनगरद्वारा प्रकाशितायाः **'सरफरोशश्रेण्याः'** कतिपयगुजरातीभाषायां प्रणीतग्रन्थानां संस्कृतभाषायाम् एकस्मिन् अभियानेऽनुवादं कारयित्वा तेषां प्रकाशनमपि विश्वविद्यालयः करोति। तदन्वयेनान्येषां नवोदितलेखकानां प्राप्तप्रतिष्ठानां लेखकानाञ्चा-प्रकाशितपुस्तकानां प्रकाशनमपि कर्तुं प्रवृत्तोऽस्ति। अस्मिन्नेव सन्दर्भे **के. पी. महेता** रचितोऽयं **प्रा. ललितः पटेलः** तथा **श्री गोपाल उपाध्यायाभ्याम्** अनुदितोऽयं **खुदीरामः बोझः** नामधेयः ग्रन्थः सादरं प्रकाश्यते। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

।। जयतु सोमनाथः जयतु संस्कृतम् ।।

प्रो. पंकज एल. जानी

कुलपतिः

अनुक्रमणिका

प्रकरणम् - १

बङ्गभङ्गः आन्दोलनम्

भारतस्य पूर्वदिशि सूर्यः प्रकाशते स्म । पक्षिणां वृन्दानि उड्डयनं कुर्वन्ति स्म । तेषां कण्ठेभ्यः मधुरः ध्वनिः निर्गच्छति स्म । सूर्यरश्मयः शरदृतोः शैत्यं दूरीकुर्वन्ति स्म । वातावरणे महती उष्णता प्रसरति स्म । ग्राम - ग्रामतः धेनुवृन्दानि वनं प्रति प्रस्थानं कृतवन्ति आसन् । प्रातः प्रत्येकं जीवने नवजीवनं पूरयति स्म ।

एतस्मिन् समये एकः विशालः जनसमूहः पुण्यसलिलां भागीरथीं प्रति गच्छन् आसीत् । सहस्रजनानां संदर्भः आसीत् । बालकाः, युवानः, युवतयः, वृद्धाः, मातरः, सर्वेऽपि गङ्गां प्रति गच्छन्तः आसन् ।

सर्वस्य अग्रे श्वेतश्मश्रुलः, लम्बकेशः, तप्तकाञ्चनमुखः, महामुनिः, विशालकायः कश्चन जनः आसीत् । असुरसंहाराय युद्धरतः भगवान् पिनाकापाणिः इव सः आसीत् । अस्य प्रत्येकं चरणं दृढतापूर्वकम् उच्चलति स्म । तस्य चलने न शिथिलता आसीत्, न च शीघ्रता । नेत्रे स्वप्नानां प्राचुर्यम् आसीत् ।

एतस्याः व्यक्तेः पृष्ठे वारं वारं जयघोषः भवति स्म । कर्णविहारगर्जनाः श्रूयन्ते स्म । किन्तु इमं महापुरुषं किमपि न स्पृशति स्म । अस्य पृष्ठे स्थितः जनसमुदायः यथा यथा अग्रतः भवति स्म तथा तथा विशालायते स्म ।

जनसमुदायः अयं कलकत्तामहानगरस्य आसीत् । तेषां मार्गः गङ्गातटं प्रति आसीत् । यः जनसमुदायः अग्रेसरः आसीत्, तस्य नेता आसीत् रवीन्द्रनाथः टागोरः ।

हिन्दुस्तानस्य वाईसरोट-लोर्ड कर्झनः दृढः, चतुरः, शठः, राजनीतौ अष्टाङ्गखेलकः चासीत् । हिन्दुस्तानस्य वाईसरोयरूपेण सत्तां स्वीकृत्य तेन अवलोकितं यत् - हिन्दुस्ताने प्रजाकीय - आन्दोलनेषु प्रमुखः वर्तते बङ्गालः । बङ्गालेन यत्किमपि प्राप्तं तत्सर्वं स्वयंभु । तस्य साहित्ये वैदेशिकस्य साहित्यस्य कलङ्कः न आसीत् । विद्या - तेजस्विता - गौरव- स्वातन्त्र्य-कृषि-उद्योग-साहित्य-कलादिषु क्षेत्रेषु बङ्गालः अग्रेसरः आसीत् । नेतृत्त्वाय शक्तिरासीत् बङ्गाले । शिक्षाक्षेत्रे अपि बङ्गालः सर्वस्मात् अग्रे आसीत् । राजकारणम् अपि बङ्गालवत् कस्मिन्नपि प्रान्ते विकसितं न आसीत् ।

श्रेष्ठतराणां नेतॄणां वंशः बङ्गाले अवतरन् आसीत् । एतावत् एव न, अपि तु सशस्त्र-आन्दोलनेऽपि बङ्गालः अग्रेसरः अभवत् ।

येन शासनं कम्पते स्म तादृशस्य सशस्त्रान्दोलनस्य केन्द्रबिन्दुः बङ्गालः अभवत् । बङ्गालस्य क्रान्तिवीराः मस्तके वस्त्रपट्टिकाबन्धनं कृत्वा निर्गताः आसन् । बलिदानस्य भावना एवं स्वातन्त्र्यस्य इच्छा प्रत्येकं बङ्गालीजनस्य हृदये आसीत् । लोर्डकर्झनः आगमनेन सहैव बङ्गालम् अवगतवान् । तेन निर्णयः कृतः यत् बङ्गालस्य अस्मिता, शक्तिं पौरुषत्वं च यावत् शीघ्रं न मर्दयिष्यामः तावत् आन्दोलनस्य अयं रोगः दावाग्निः इव संपूर्णे भारते प्रसरिष्यति । बङ्गालस्य शक्तिं मर्दयितुं, वीरत्वं दमयितुं, आन्दोलनं भस्मसात् कर्तुं, राजकारणं नष्टं च कर्तुं लोर्डकर्झनेन बङ्गविभाजनम् आचरितम् । खण्डद्वयेन बङ्गालस्य शरीरात् शिरश्छेदः तेन कृतः । लोर्डकर्झनेन लण्डनस्थितहिन्दमन्त्रिणः अनुमतिः स्वीकृता । तेन स्वस्य गोपनीय-अर्धसर्वकारीयपत्रे हिन्दमन्त्रिणं लिखितम् -

"बङ्गालः इदानीं हिन्दुस्तानस्य हृदयम् अस्ति । सर्वाः प्रवृत्तयः कलिकतायाम् एव उत्पाद्यन्ते । क्रान्तिवीराणां गुप्तमण्डलानि बङ्गालस्य ग्रामे ग्रामे संस्थापितानि वर्तन्ते । तेषु सङ्घटनं गजः इव दृढं वर्तते । क्रान्तीवीराणां समीपे विस्फोटकाः, कारतूसगोलिकाः, भुशुण्डयः, अणुविस्फोटकाः, सदृशानि हस्तशस्त्राणि सन्ति । विशेषरूपेण युवकैः एतादृशानि मण्डलानि प्रपूर्यन्ते । मण्डलानि व्यवस्थितानि कृतनिश्चयानि च सन्ति ।

विभाजनेन विना बङ्गालस्य बलत्रोटनं न भविष्यति । नियमव्यवस्थादृष्ट्या बङ्गालः विशालः, अतः व्यवस्थापनानुकूल्यस्य व्याजेन बङ्गालबलत्रोटनम् आवश्यकम् एव । क्रान्तिवीरवृन्दैः आश्चर्यकारिकाः योजनाः प्राप्यन्ते । लोकेषु एतेषु स्वातन्त्र्यभावना उद्भाविता वर्तते । रोगस्य अस्य प्रसरणं भवेत् तस्मात् पूर्वं तस्य अवरोधः कर्तव्यः । साम्राज्यस्य कृते एतत् चिन्तायुक्तम् ।

सर्वमेतत् अवरोद्धुं बङ्गभङ्गः आवश्यकः । बङ्गविभाजनेन बङ्गजनानां त्रोटनं, तेषां विकासत्रोटनं च भविष्यति । खण्डद्वयेन बङ्गालः पङ्गुः भविष्यति । अतः बङ्गविभाजनाय सर्वकारः मह्यम् अनुमतिं दद्यात् । अहं बङ्गालं दण्डयितुम् इच्छामि ।

हिन्दमन्त्री लोर्डकर्झनाय अनुमतिं दत्तवान् । ततः सत्वरमेव लोर्डकर्जनः सकृत्प्रहारेण बङ्गालस्य भागद्वयं कृतवान् । गुप्ततायै ख्यातः आसीत् कर्झनः । चित्रकवत् सावधानेन

व्याघ्रगत्या च तेन बङ्गभङ्गः कृतः ।

प्रज्वलितः अभवत् बङ्गालः । शेषधिक्कारकल्लोलः बङ्गाले विस्तृतः । राजपुरुषाणां शेषः अपि प्रज्वलितः । कविलेखकसर्जकानां नेत्राणि रक्तानि सञ्जातानि । समाजसेवकाः एतम् आघातं न सोढवन्तः ।

"मातृभूमिबङ्गालस्य खण्डद्वयम् ! न ... न.... असह्यमेतत् । अस्मितात्रोटनाय प्रयत्नपूर्वकं कृतः प्रयासः अयम् ।"

"जाग्रत.... उत्तिष्ठत... अस्माकं सुजला सुफला भूमिः विभाजिता । जन्मभूमिः आह्वयति ।

क्रान्तिवीराणां गुप्ताधिवेशनानि मध्यरात्रौ प्रपूरितानि । कलकत्तास्थित-आग्लानां सामूहिकहत्यायोजनां यच्छतु, कर्झनस्य वधं करोतु इति ।

युवकानां क्रान्तिवीराणां पराक्रमः प्रज्वलितः । करिष्यामः वा मरिष्यामः इति नीतिं स्वीकृत्य वीरभद्राः रणमार्गं प्रस्थितवन्तः ।

लोर्डकर्झनस्य इदं घृणास्पदं कार्यं प्रति विराटं शान्तं च विरोधं कर्तुं कविवरः टागोरः नेतृत्त्वं स्वीकृतवान् । विशाला सङ्घयात्रा गङ्गातटं गच्छति स्म ।

कविवरः टागोरः पुण्यसलिलायाः भागीरथ्याः प्रवाहे अवत्तीर्णः । अञ्जलौ गङ्गाजलं स्वीकृत्य उक्तम् -

"अहम् अद्यारभ्य, अस्मात् क्षणात् प्रतिज्ञाबद्धः अस्मि यत् मम सुजलायाः धरायाः खण्डान् अवरोत्स्यामि । आधारभ्य मम एकमेव कार्यं भविष्यति । अहं जीवनान्तपर्यन्तम् अस्मै ध्येयाय अहिंसकयुद्धं करिष्यामि । "

एवम् एकम् कृत्वा सर्वेऽपि गङ्गाजले अवतीर्णाः । अञ्जल्यां जलं स्वीकृतवन्तः । कविवरः टागोरः तान् प्रतिज्ञाबद्धान् कृतवान् ।

टागोरः उत्साहपूर्वकं जनसमर्दं प्रबोधितवान् -

"बङ्गजनाः ! अस्माकं मातृभूमिं लोर्डकर्झनः खण्डितवान् अस्ति । खण्डितमूर्तिपूजायाः भारतीयधर्मशास्त्रे निषेधः वर्तते । खण्डितबङ्गालस्य वयं पूजां कर्तुम् अशक्ताः, किञ्च मातुः अहर्निशपूजा अनिवार्या । अद्य वयं खण्डितबङ्गालम् अखण्डितं कर्तुं

वयं प्रतिज्ञाबद्धाः स्मः । परस्परं प्रतिज्ञायै वयं गम्भीराः जागरूकाः च भवेम । गृहे गृहे रक्षाबन्धनं कुर्वन्तु । बङ्गविभाजनस्य प्रचण्डं विरोधं कुर्वन्तु । शासनस्य पादाः कम्पिताः भवेयुः तदर्थम् आन्दोलनानि कुर्वन्तु, एवं च कर्झनं दर्शयतु यत् बङ्गालस्य अस्मिता प्रतिरोद्धुं न शक्यते ।"

कविवरः टागोरः प्रोवाच - वन्दे मातरम् ! सहस्राणां कण्ठेभ्यः प्रतिघोषः उदितः - वन्दे मातरम् !

यथा एका भगिनी रक्षाबन्धनस्य उत्साहं धारयति तथा बङ्गजनैः उत्सवः मन्यते स्म । दूरे जनाः रक्षाबन्धनाय मग्नाः । स्वसमक्षं किशोरद्वयं दृष्ट्वा कवेः नेत्रे चकिते ।

'वन्दे मातरम् गुरुदेव !' एकः कृशतनुः अपरः च सशक्ततनुः । एवं नमस्कारं कृतवन्तौ द्वावपि । वन्दे मातरम्, बालकौ! भवन्तौ प्रतिज्ञां स्वीकृतवन्तौ वा ? गुरुदेवः आह ।

गङ्गासाक्ष्ये आवां प्रतिज्ञां स्वीकृतवन्तौ, परन्तु आवां दूरतः समागतौ स्वः । कलिकतायां न कोऽपि सम्बन्धः, अपरः किशोरः उक्तवान् !

"गुरुदेव ! भवान् आवां रक्षाबन्धनं करोतु" - अवश्यम्, गुरुदेवः द्वयोः हस्ते रक्षाबन्धनं कृतवान् ।

"बङ्गभङ्गस्य विरोधे भवन्तौ किं करिष्यतः ?"

"लोर्डकर्झनस्य हत्यां करिष्यावः । यदा आवयोः हस्ते शस्त्रम् आगमिष्यति तदा कर्झनं दर्शयिष्यावः बङ्गालस्य जलम्।"

कविवरः उपदिष्टवान् - न बालकौ, अस्माभिः अहिंसकयुद्धं करणीयम् । अस्माभिः शक्तिः सङ्घटिता कर्तव्या । अन्यथा शक्तेः विकेन्द्रिकरणं भविष्यति । भवन्तौ, जनसमुदायेन सह भवेताम् ।"

गुरुदेव ! आशीर्वादं प्रयच्छतु ।

'मम शुभकामनाः,' गुरुदेवेन उक्तम् ।

'भवतोः नाम किम् ?' इति टागोरः प्रोवाच ।

'मम नाम खुदी, खुदीरामः बोझः' - कृशवपुः किशोरः उक्तवान् । एवं च अयं मम मित्रम्, प्रफुल्लः, प्रफुल्लचन्द्रः चाकी ।

एवं सुहृदौ दिवसद्वयं कलिकत्तायं वासं कृतवन्तौ, तथा देशनेतृणां, समाजसुधारकाणां, राजपुरुषाणां च भाषणानि श्रुतवन्तौ ।

द्वौ अपि दृष्टवन्तौ यत् बङ्गविभाजनेन बङ्गालप्रदेशः रोषात् प्रज्वलितः अस्ति । सर्वेऽपि नेतारः स्वार्थं परित्यज्य राजकारणं च विस्मृत्य सङ्घटिताः अभवन् । सर्वासु दिक्षु चर्चा आसीत् 'बङ्गभङ्गः' इति ।

जनैः सभाः पूरिताः । प्रदर्शनेन आन्दोलनेन च बङ्गालः गुञ्जितः । लोर्डकर्झनः हठाग्रही आसीत् । सः दमनं कृतवान् । कलिकतायाः वीथ्यः आरक्षकैः प्रपूरिताः । दण्डप्रहारः अश्रुवायुप्रहारः गुलिकाप्रहारः च अभवत्, किन्तु बङ्गालः निजध्वजम् अधः स्थापयितुम् असन्नद्धः ।

गुरुदेवः टागोरः सत्याग्रहस्य नेतृत्त्वं स्वीकृतवान् । गम्भीरया वाचा तेन उक्तम् -

"भोः नगरजनाः ! बङ्गालं जागरयतु, ग्रामे ग्रामे जनजागृतिम् आनयतु । वयम् अन्तिमश्वासावधिपर्यन्तं युद्धं करिष्यामः । अस्माकं युद्धे कुत्रापि हिंसायाः स्थानं नास्ति । अहिंसाशस्त्रम् अस्मभ्यं वंशपरम्परया प्राप्तम् अस्ति । वयं लोकं दर्शयिष्यामः अहिंसकमार्गेऽपि बङ्गालः युद्धं कर्तुं शक्नोति इति । सङ्घटिताः भवन्तु, जागृताः भवन्तु, अन्यान् जागरयन्तु च ।"

दिवसद्वयस्य वासेन खुदीरामप्रफुल्लौ ज्ञातवन्तौ यत् किं नाम युद्धम् ? एतादृशविशालाः सभाः प्रचण्डः लोकसमूहः, दीर्घाणि प्रदर्शनानि च ताभ्यां कदापि नैव दृष्टानि ।

अन्ते रेलयानाङ्गप्रकोष्ठे उपविष्टवन्तौ ।

●●●

प्रकरणम् - २

बाल्यकालः

बङ्गालस्य मेदिनीपुरजनपदस्य केशपुरमण्डलस्य मोहबनीग्रामे एकस्मिन् ब्राह्मणकुटुम्बे ३ दिसम्बर, १८८९ तमे दिवसे जन्म अभवत् । खुदीरामस्य जन्मदिवसः मङ्गलवारः एवं समयः सायङ्कालः आसीत् । मातुः नाम लक्ष्मीप्रियादेवी तथा पितुः नाम त्रैलोक्यनाथः बसुः आसीत् । सः नन्दझोलस्य अनुमण्डलकराधिकारी आसीत् ।

त्रैलोक्यनाथस्य पुत्रीत्रयम् - अपरूपादेवी, सरोजनी, ननिबाला च ।

एका वृद्धा अपरां प्रौढां वदति स्म - यत् "लक्ष्मीप्रियायाः कुक्ष्यौ देवांशः इव पुत्रः अवतरितः, किन्तु सा लक्ष्मीप्रिया दुर्भाग्यशालिनी । तस्याः एकः पुत्रः अपि न जीवति । सत्यं कस्यापि देवस्य शापः स्यात् । तस्या पुत्रद्वयमपि मृतम् ।

"लक्ष्मीप्रिया तु सरला पतिपरायणा गृहिणी वर्तते, एषः पुत्रः जीवेत् एव । अयि, रुक्मणिबा ! अस्ति कश्चन उपायः दर्शयतु अस्ति चेत् " इति प्रौढा प्रोवाच ।

वृद्धा उक्तवती - " उपायः अस्ति, चल पुत्रवधु ! । आवां त्रैलोक्यनाथस्य गृहं गच्छावः । पुत्रः यथा जीवेत् तथा उपायं लक्ष्मीप्रियायै दर्शयिष्याम्यहम् । त्रैलोक्यनाथस्य गृहं गतवन्तौ ।

रुक्मणिबा प्रोवाच - "शृणु लक्ष्मीप्रिये, अयं भवत्याः शिशुः न । यदि भवती भवत्याः पुत्रः अयम् इति गणयिष्यति तर्हि शिशुः अयं न जीविष्यति, यतः कयाचित् डाकिन्या तन्त्रप्रयोगेण ताडिता त्वम् । अतः बालकः अयं मम पुत्रवध्वाः अनुपमायाः अस्ति इति मत्वा तस्याः उत्सङ्गे स्थापयतु, अनन्तरं मूल्येन स्वीकरोतु । अनन्तरं तथैव कृतम् ।"

ततः एकदा त्रैलोक्यनाथः गृहसुशोभनं कृतवान् । मित्रेभ्यः बान्धवेभ्यः च आमन्त्रितवान् । दिवसेऽस्मिन् पुत्रनामकरणसंस्कारोत्सवः स्थापितः तेन । अपराह्ने त्रिवादने शुभमुहूर्ते लक्ष्मीप्रिया बालकम् उत्सङ्गे स्वीकृत्य अतिथिसत्काराय व्यस्ता आसीत् । अपरूपा - सरोजनी - ननिबालाः आनन्दिताः आसन् । अपरूपा ज्येष्ठा आसीत् । त्रैलोक्यनाथः झटिति तस्याः विवाहं कर्तुं कामयते स्म । शाटिकां धृत्वा सा गम्भीरा दृश्यते स्म । पण्डितः

नामकरणविधिं समाप्य त्रैलोक्यनाथाय लक्ष्मीप्रियायै च दीर्घायुर्भव इति आशीर्वादं दत्तवान् । परम्परानुसारं नाम तु ज्येष्ठाः कुर्वन्ति स्म, किन्तु अनुपमायाः (प्रतिवेशिन्या) हस्तक्षेपेन अपरूपायाः मुखात् 'खुदीरामः' इति नाम निर्गतम् । सर्व एव तत् नाम स्वीकृतवन्तः । उपस्थिताः सर्वाः व्यक्तयः 'खुदीराम बोझ' इति स्वीकृतवन्तः ।

बङ्गाले अक्षतपैष्टकस्य कृते 'खुदी' उच्यते । खुदीं दत्त्वा बालकः संप्राप्तः, अतः अस्य नाम खुदीरामः संस्थापितम् ।

खुदीरामः मासचतुष्टस्य अभवत् । मुखं सुन्दरम् आसीत् । यः तं पश्यति स्म सः प्रेम्णा लालयति स्म । कस्यापि उत्सङ्गे सः रोदनं न कोरति स्म । सर्वाधिकं सः ज्येष्ठभगिन्याः अपरूपायाः अङ्के क्रीडति स्म । तस्याः विवाहार्थं चर्चा अभवत् । कालेऽस्मिन् १२ वर्षीयबालिका विवाहयोग्या मन्यते स्म । त्रैलोक्यनाथः सम्माननीयः नारजीलस्य राजसभायाम् अनुमण्डलाधिकारी आसीत् । फेब्रुआरी १८९७ तमे अपरूपा विवाहिता । विवाहानन्तरम् अपरूपा श्वसुरगृहं गतवती ।

अपरूपा पितरौ त्यक्त्वा यत्दुःखम् अनुभूतवती तस्मात् अधिकं दुःखं भ्रातुः खुदीरामस्य वियोगेन अभवत् ।

खुदीरामः वर्षत्रयस्य सञ्जातः । खुदीरामस्य भगिन्याः सरोजन्याः विवाहः अपि संपादितः । गृहे ननिबालया सह खुदीरामः एव अवशिष्टः ।

लक्ष्मीप्रिया रुग्णा तिष्ठति स्म । वैद्यद्वारा चिकित्सा कारिता, किन्तु रुग्णता न दूरीभूता । १८ ओक्टोबर १८९५ शुक्रवासरे यदा खुदीरामः षड्वर्षीयः आसीत् तदा लक्ष्मीप्रिया दिवं गता । खुदीरामस्य बालमनसि मातुः मृत्योः गहनप्रभावः पतितः ।

त्रैलोक्यनाथः बालकानां कृते चिन्तितः आसीत् । राजसभायां सेवाकार्येण सह बालकद्वयस्य पालनम् अशक्यम् । अतः त्रैलोक्यनाथेन द्वितीयः विवाहः कृतः । उपमात्रा सह खुदीरामस्यानुकूल्यं न भवति स्म । कृते प्रयत्नेऽपि न बालकेभ्यः सुखं दत्तवान्, न च पत्न्यै । १४ फेब्रुआरी १८९६ तमे त्रैलोक्यनाथः पञ्चत्वं प्राप्तवान् ।

ज्येष्ठा भगिनी अपरूपा श्वसुरगृहं हटिगढियाग्रामं बालकद्वयम् उपमातुः त्रासात्

निवार्य नीतवती । खुदीरामः पठनाय तत्रैव विद्यालयं प्रविष्टः ।

खुदीरामः बोड्गः नैसर्गिकः देशभक्तः आसीत् । सः सप्तवर्षीयः आसीत् तदा चिन्तयति स्म 'भारतं मम देशः, सहस्रेभ्यः वर्षेभ्यः अस्माकं परम्परा प्रचलिता अस्ति तथापि वैदेशिकाः आग्लजनाः अत्र किमर्थं सन्ति ? अहं वयस्कः भूत्वा तान् निष्कासयिष्यामि ।' बहूनि दिनानि सः एतादृशान् विचारान् करोति स्म ।

एवं बाल्यावस्थायां सन्नपि खुदीरामः स्वदेशस्य स्वतन्त्रतायै चिन्तां करोति स्म । एषा एव समस्या तस्य मनसि वारं वारम् उपस्थिता भवति स्म ।

यदा खुदीरामः एतादृशचिन्तायाम् आसीत् तदा सः 'वन्दे मातरम्', 'भारतमाता जयतु' इति श्रुतवान् । एभिः शब्दैः तस्य मनसि उत्साहनिर्माणम् अभवत्, नेत्रे च चकिते लघुवयसि तेन पित्रोः मरणं दृष्टमासीत् । अतः सः भावुकः अभवत् । सः वारं वारं व्यथितः भवति स्म । भोजनेऽपि आलस्यं करोति स्म ।

कृशवपुः सन् अपि खुदीरामः कस्मात् अपि भयं न अनुभवति स्म । अष्टवर्षीयः सः मिथ्यापरम्परायाः विरोधं करोति स्म ।

एकदा खुदीरामः भागिनेयेन ललितेन सह विपणिं प्रति गच्छति स्म, तदा सः एकस्मिन् मिष्टान्नापणे तिष्ठन्तम् आग्लजनं दृष्टवान् । अङ्ग्रेजः मिष्टान्नं क्रीणाति स्म । मिष्टान्नं स्वीकृत्य धनं, अदत्त्वा यदा सः प्रस्थातुम् उद्युक्तः तदा आपणिकः प्रोवाच - "भो, अङ्ग्रेज महाशय ! भवान् धनमेव न दत्तवान् ।"

अङ्ग्रेजः आपणिकं तर्जितवान् - "त्वं, मत् धनं स्वीकरिष्यति वा ?"

समयेऽस्मिन् खुदीरामः आपणं प्रति उपसृत्य द्वयोः कथनं श्रुतवान् । तेन दृष्टं यत् आपणिकेन पुनः धनाय आग्रहः कृतः तदा सः अङ्ग्रेजः तं ग्रैवेयकेन गृहीत्वा अधः च पातयित्वा यष्ट्या ताडनम् आरब्धवान् । आपणिकः आर्द्रस्वरेण उक्तवान् - "सर्वकार ! मम दोषः सञ्जातः । भवान् इच्छति चेत् अन्यमिष्टान्नमपि स्वीकरोतु, किन्तु मां न ताडयतु सर्वकारः ।"

दृश्यमिदं दृष्ट्वा खुदीरामः अङ्ग्रेजाय कुपितः । यदि अहं वयस्कः अभविष्यं तर्हि

अङ्ग्रेजेन सह युद्धम् अकरिष्यम् इति । सङ्घटिताः सर्वेऽपि जनाः इदं दृश्यं पश्यन्तः आसन् । सः एकाकी अङ्ग्रेजः तथापि तम् आपणिकं ताडयति स्म । एतत् खुदीरामस्य मनसि न अवगम्यते स्म । गृहं गत्वा सः सर्वमिदं भगिनीं पृष्टवान् । सा उक्तवती - "खुदी, त्वं कनिष्यः असि.... ज्येष्ठः भविष्यसि तदा ज्ञास्यसि ।"

भवतु नाम कनिष्ठः अहम्, किन्तु भगिनि ! एतावान् लघुः नास्मि यत् भवत्याः कथनम् न अवगच्छामि इति खुदीरामः उक्तवान् ।

"अस्माकं देशः अङ्ग्रेजैः पराधीनः वर्तते, पुनः नास्ति अधिकारः पराधीनानां प्रश्नोत्तरीं कर्तुम्........"

"किन्तु अस्माकं देशः परतन्त्रः किमर्थम् ?" अपरूपा तु खुदीरामस्य प्रश्नानाम् उत्तराणि दातुं न शक्तवती ।

इदानीं खुदीरामः सततं विचारयति स्म यत् किमर्थम् अस्माकं देशः परतन्त्रः ?

पतिः अमृतबाबुः गृहं समागत्य अपरूपां वृत्तिस्थानान्तरणविषये सूचितवान् । एकदा सर्वम् उपसंहृत्य पत्या सह तामलुकम् आगतवती अपरूपा । खुदीरामः तामलुके नूतनमित्रनिर्माणे समयं यापयति स्म । खुदीरामललितौ तामलुके हैमिल्टन हायर इंग्लिशविद्यालयं प्रविष्टवन्तौ । प्रारम्भे खुदीरामस्य मनः अभ्यासे न आसीत् ।

एकदा गणितविषयस्य परीक्षासमये एका घटना सञ्जाता । परीक्षायां खुदीरामः पार्श्वस्थितं बालकं प्रश्नस्य उत्तरं पृष्टवान् । अध्यापकः द्वयोः वार्तालापं श्रुतवान् आसीत् । पृष्टे सति अध्यापकस्य समक्षं खुदीरामः सर्वं सत्यमेव उक्तवान् । तदा अध्यापकेन उक्तम् यत् - "अहं जानामि त्वं दुर्ललितः असि, आदिनं क्रीडसि, किन्तु सत्यम् उक्तवान् असि, अतः क्षमां ददामि तुभ्यम् ।"

अस्मात् क्षणात् खुदीरामे परिवर्तनं समागतम् । इतः परं विद्यालयात् गृहम् आगत्य सः अजस्रं पठनं करोति स्म । सः पुस्तकानि परिशीलयति स्म । केवलं ललितेन सह क्रीडति स्म । सहसा एव खुदीरामस्य गणना पटुच्छात्रेषु आरब्धा ।

ख्रिस्ताब्द १९०४ पर्यन्तं खुदीरामः आवुत्तेन सह वासं कृत्वा षड्कक्षापर्यन्तं

पठितवान् । अनन्तरं १९०५ तमे वर्षे मेदिनीपुरे कोलेजियनस्कूलमध्ये प्रवेशं लब्धवान् । तदा सः चतुर्दशवर्षीयः आसीत् । अभ्यासे अधिका रुचिः अभवत् । बंकिमचन्द्रचट्टोपाध्यायस्य सर्वाः कृतयः तेन पठिताः । प्रभावितः सः आनन्दमठात् । स्वामिविवेकानन्दस्य याः रचना उपलब्धाः आसन् ताः सर्वाः तेन अधीताः ।

पठनादतिरिच्य व्यायामः अपि तस्मै अरोचत । व्यायामाय सः नियमितविद्यालयं गच्छति स्म । व्यायामशिक्षकः आसीत् तस्य रामचन्द्रः सेनः ।

दिनानन्तरं मेदिनीपुरे राज्यपालमहोदयस्य कार्यक्रमः निश्चितः । मेदिनीपुरे समागतस्य राज्यपालमहोदयस्य पुरतः नानाविधविद्यालयेभ्यः नैके छात्राः भिन्न-भिन्नक्रीडाप्रदर्शनं कृतवन्तः । एभिः छात्रैः सह खुदीरामः अपि भागम् अगृहणात् । खुदीरामस्य क्रीडाप्रदर्शनं सर्वश्रेष्ठं घोषितम् । स्वयं राज्यपालमहोदयः अपि तस्य प्रशंसां कृतवान् । सः खुदीरामस्य एवं व्यायामशिक्षकरामचन्द्रसेनस्य विषये पृष्टवान् । रामचन्द्रसेनस्य वेतनवृद्धिं कृतवान् तथा खुदीरामाय पारितोषिकं शुल्कक्षमापनं छात्रवृत्तिं च दत्तवान् । नियमितव्यायामेन खुदीरामबोड्गस्य शरीरं सशक्तम् अभवत् । अध्ययनेन व्यायामेन च अस्मिन् आत्मविश्वासः समुत्पन्नः ।

खुदीरामेण स्वल्पे समये नैकानि पुस्तकानि पठितानि । सः स्वस्मिन् एव अस्वस्थतायाः अनुभवं करोति स्म । समाजे कुपरम्पराणां, कुप्रथानां, बालविवाहस्य विषये नियमाः आसन् तथापि बालविवाहः भवति स्म । ताभिः कुपरम्पराभिः तस्य मनः व्यथितमासीत् । असत्यं तु नितान्तं घृणास्पदं तस्य कृते । तेन अवलोकितं यत् अल्पस्वार्थाय समाजस्य अमुकवर्गः अड्ग्रेजान् प्रसन्नान् कर्तुं प्रयतते स्म । एकान्ते खुदीरामः बह्वीः घण्टाः यावत् विचारयति स्म ।

खुदीरामस्य नूतनं परिवर्तनं दृष्ट्वा अपरूपादेवी चिन्तामग्ना अभवत् । सा न खुदीरामं वक्तुं शक्नोति स्म, न तु पतिम् । मेदिनीपुरं समागत्य अपरूपादेवी योग्येन वरेण सह नानिबालायाः विवाहं कारितवती । चिन्ता आसीत् केवलं खुदीरामस्य । तस्याः इच्छा आसीत् यत् खुदीरामः अभ्यासं पूर्णं कृत्वा वृत्तिं प्राप्येत । तदनन्तरं योग्यां कन्यां वीक्ष्य खुदीरामस्य विवाहः करणीयः । प्रेमवशात् सा खुदीरामं किमपि वक्तुं न शक्नोति स्म । अपरूपादेवी इदानीम् अवगतवती यत् खुदीरामः तस्या हस्तात् गतः । खुदीरामः स्वस्य

भविष्यस्य अभ्यासस्य च विषये चिन्तनम् अकृत्वा देशसमाजयोः चिन्तनं करोति स्म । तस्य मनसि वारं वारं १८५७ क्रान्तिः असफला किमर्थम् अभवत् ? इत्यस्मिन् विषये विचारः आगच्छति स्म । सः अङ्ग्रेजानाम् आगमनस्य, देशपरतन्त्रतायाः च कारणानि चिन्तयति स्म । येन केन प्रकारेण देशः आंग्लप्रभुत्वात् मुक्तः करणीयः इति कृतसङ्कल्पः आसीत् सः ।

एकवारं सः मन्दिरस्य अलिन्दे उपविश्य चिन्तयन् आसीत् । रात्रिः अपगता । वृद्धः पूजकः तम् उपगत्य उक्तवान् - वत्स ! प्रायः एकस्मात् मासात् त्वं मन्दिरम् आगच्छसि, किमपि पश्यसि इति अहं पश्यामि । किम् अहं तव समस्यां ज्ञातुं शक्नोमि वा ? केन प्रकारेण अहं साहाय्यं करोमि ?

खुदीरामः मौनं स्थितवान् । ततः मनसः विचारान् पूजकस्य समक्षं प्रकटीकृतवान् । पूजकेन उक्तम् - "वत्स ! तव वयः न्यूनम् । इतोऽपि संसारम् अवगच्छ, अनन्तरं निर्णयं कुरु" इति ।

कथम् अवगच्छामि संसारम् ? खुदीरामः पृष्टवान् ।

इतः बहिर्गत्वा संसारम् अवगन्तुं शक्यते इति पूजकः उक्तवान् । अहं प्रयत्नं करिष्यामि इति खुदीरामेण भणितम् ।

अनन्तरं कमपि अनुक्त्वा सः गृहं त्यक्तवान् । सः कुत्र गतवान् इति न जानाति स्म कोऽपि । अपरूपादेवी आरात्रि भ्रातुः प्रतीक्षां कृतवती । प्रातः सा मन्दिरं गत्वा पूजकं पृष्टवती । दिवसेऽस्मिन् खुदीरामः मन्दिरं न आगतः इति पूजकेन उक्तम् । अपरूपा रोदनम् आरब्धवती तदा तस्यै आश्वासनम् अददात् पूजकः ।

एकस्मिन् दिवसे सा खुदीरामस्य पत्रं प्राप्तवती । पत्रे लिखितम् आसीत् यत् मया संन्यासग्रहणाय निर्णयः कृतः । गृहपरित्यजनाय क्षमायाचना अपि कृताऽऽसीत् पत्रेऽस्मिन् । अपरूपादेवी पत्रं पठित्वा भयभीता अभवत् । कानिचित् दिनानि तया भोजनमपि न कृतम् । खुदीरामस्य मेलनं न सम्भविष्यति इति तस्याः मनसि अभवत् ।

खुदीरामः मेदिनीपुरतः पद्भ्यां निर्गतः । ग्रहतः निर्गतः सः न जानाति स्म कुत्र गन्तव्यम् इति । रात्रौ घोषस्य धर्मशालायां सः न्यवसत् । अपरेद्युः प्रातः ततः निर्गतवान् ।

ततः भगिन्यै सः पत्रम् अलिखत् । चलन् सः कृषिक्षेत्रं गत्वा वृद्धस्य समीपं प्राप्य जलं पीतवान् । तस्य वृद्धस्य नाम आसीत् अतुलघोषः । तस्य आग्रहेण खुदीरामः बांकुरायां तस्य गृहे उषितवान् । खुदीरामः बहवः मासाः यावत् तत्र कृषिकार्यं कृत्वा ग्राम्यजीवनस्य अनुभवं प्राप्तवान् ।

अत्र स्थित्वा खुदीरामः अनुभूतवान् यत् - दरिद्रसाधारणकृषकानां रक्तपानां, धन-श्रम-बलोपरि विश्रामयुक्तजीवनजीवतां भूस्वामिनां प्रतिष्ठा अपि सुरक्षिता न । अङ्ग्रेजीशासने तेषां निष्ठा आसीत् । समये समये तेषाम् अवमानं भवति स्म । खुदीरामेण वृद्धघोषद्वारा कानिचित् उदाहरणानि श्रुतानि । कृषिवलानां ग्रामीणानां च दयनीया स्थितिः तेन दृष्टा । देशवासिनां दयनीयां स्थितिं विलोक्य अस्य मनः नितान्तं व्यथितमासीत् ।

बाङ्कुरायां स्थित्वा सः स्वोद्देश्यमपि तत्र प्राप्तवान् । ग्रामीणजीवनं द्रष्टुं या आकाङ्क्षा आसीत् सा ईदानीं पूर्णा जाता । तस्य बाकुरायां वासः इदानीं व्यर्थः । वृद्धघोषस्यानुमतिं स्वीकृत्य सः भगिनीं मेलितुं गतवान् । अपरूपा खुदीरामं वीक्ष्य प्रसन्ना अभवत् । उक्तं च -

"इदानीमारभ्य संन्यासी भवितुं का आवश्यकता आगता ?"

ललितेन उक्तम् - "मातः ! मातुलः कृतपरिश्रमः वर्तते.... अतः भक्ष्यं भोजयित्वा विश्रमितुम् अवसरं देहि "

खुदीरामेण कथितम् - अहं श्रान्तः नास्मि, किन्तु बुभुक्षितः अवश्यम् अस्मि ।

भोजनं कृत्वा खुदीरामः सर्वं भगिन्यै भागिनेयाय च निवेदितवान् वृत्तान्तम् ।

खुदीरामः पठनं त्यक्त्वा आदिनं नानाविधविषयानां पुस्तकपठने समयं यापयति स्म । दिनेषु एतेषु तस्य सम्पर्कः मेदिनीपुरस्य क्रान्तिवीरेण सत्येन्द्रनाथेन सह अभवत् ।

सत्येन्द्रनाथजी गुप्तस्वरूपे एकं क्रान्तिवीराणां सङ्घटनं विरचयितुं प्रयत्नं करोति स्म । अतः तेन बहुवारं कलिकतायाः यात्रा अपि कृता । किन्तु योजनायाः अन्तिमस्वरूपात् पूर्वं नगरस्य केचन युवकाः प्रभाविताः भवेयुः इत्याशयः आसीत् तस्य ।

तस्य कथनेन केचन युवकाः प्रभाविताः सञ्जाताः, एवं च वारं वारं सत्येन्द्रनाथेन मिलिन्ति स्म । तेषु केचन खुदीरामं जानन्ति स्म । सत्येन्द्रनाथेन इतोऽपि स्पष्टता कृता नासीत् यत् सः क्रान्तिवीराणां सङ्घटनं करोति स्म । सः ज्ञातुं यत्नं करोति स्म यत् के किशोराः युवकाः मत्कृते उपयोगिनः भविष्यन्ति इति ।

ज्येष्ठ ! मम हृदये वह्निः प्रज्वलितो वर्तते । एष वह्निः कुत्रचित् ब्रिटिश-साम्राज्यस्य चिता भविष्यति अथवा मम आत्मनः ... यदि मम चिता भविष्यति तदा भवान् अवश्यं पश्यति, ज्येष्ठ.... यावत् पर्यन्तं ब्रिटिशसाम्राज्यम् अस्यां चितायां ध्वस्तं न भविष्यति तावत् पर्यन्तं वह्निः अयं न श्रान्तः स्यात् ।

भवतः उत्साहे मम विश्वासः खुदीराम! अतः अहं यत्सङ्घटनं कर्तुम् इच्छामि, तस्मिन् भवान् प्रथमः सैनिकः स्यात् । तेन माध्यमेन देशाय बलिदानं दातुं भवते अवसरः प्राप्येत । अनन्तरं सत्येन्द्रनाथेन पुनः उक्तम् - "अहं भवते सर्वं दर्शयिष्यामि किन्तु भवता मह्यं वचनं दातव्यं भविष्यति यत् भवान् एतत् कस्मै अपि न कथयिष्यति इति"

"अहं वचनं ददामि," "अहं प्रतिजाने ।" "गुप्तसमितेः स्थापनं वयं जनाः मदिनीपुरे कर्तुं कामयामहे ।"

"ज्येष्ठ ! मत्कृते भवतः मार्गदर्शनस्य आवश्यकता वर्तते । देशस्य स्वातन्त्र्याय अहं मम प्राणत्यागं कर्तुम् उत्सहे ।" खुदीरामस्य स्वरे तेजः आसीत् ।

सत्येन्द्रनाथः सोत्साहेन उवाच - "भवादृशाः सुपुत्राः सन्ति भारते अतः अधिकानि दिनानि अङ्ग्रेजानां क्रूरताम् अत्याचारं च वयं न सहिष्यामहे । भारतस्वतन्त्रता दूरे न । खुदीरामः सत्येन्द्रनाथं नमस्कृतवान् । सत्येन्द्रनाथः तम् आश्लिष्टवान् ।"

"भवान् भारतस्य वास्तविकः पुत्रः अस्ति, खुदीराम !"

•••

प्रकरणम् - ३

योजनां ददातु एवं भुशुण्डी ददातु

वाईसरोय लोर्ड कर्झनः १३, दिसम्बर १९०३ तमे दिवसे बङ्गभङ्गस्य प्रस्तावं प्रस्तुतवान् । कर्झनः प्रस्तावं पारयितुं कृतनिश्चयः आसीत् । अनया घटनया समस्ते बङ्गाले घृणाभ्रभञ्जनं व्याप्तम् । अहिंसकराजपुरुषैः अहिंसकानि आन्दोलनानि आरब्धानि । कृषकाः वणिजः सेवारताः च स्वरीत्या युद्धम् आन्दोलनम् प्रारब्धवन्तः । महिलाः अपि आन्दोलनयज्ञे निपतिताः । छात्राणां सङ्घर्षः भिन्नः विशिष्टः चासीत् ।

१५ अगस्त १९०४ तमे बङ्गभङ्गप्रस्तावं स्वीकृत्य सर्वकारः तं नियमरूपेण स्थापितवान् । एवं बङ्गालस्य लोकभावनायाः तिरस्कारं कृत्वा लोर्डकर्झनः बङ्गालस्य सुप्तसिंहान् प्राबोधयत् । सर्वकारस्य एतादृशेन घृणास्पदेन निर्णयेन देशभक्ताः रोषेण प्रज्वालिताः अभवन् ।

बङ्गालः ज्वालामुखी इव प्रस्फुटितः । सभाः पूरिताः, आन्दोलनानि उग्राणि अभवन् । कृषकाः हलं परित्यज्य आन्दोलने संलग्नाः । छात्राः अपि शिक्षणं त्यक्तवन्तः ।

लोर्डकर्जनेनापि लोहमयेन हस्तेन कार्यं गृहीतम् आन्दोलनं मर्दयितुं सः आरक्षकेभ्यः सर्वाः सत्ताः दत्तवान् । कर्झनस्य कृते एषः आत्मनः यशःप्रश्नः अभवत् ।

लोर्डकर्झनः सर्वोच्चरक्षाधिकारिणाम् एकस्मिन् उपवेशने उक्तवान् - "अस्य देशस्य प्रजा अज्ञानी निरक्षरा दरिद्रा च । बङ्गभङ्ग - आन्दोलनं तु अमुकाः प्रतिष्ठाप्राप्ताः जनाः एव चालयन्तः सन्ति । देशस्य बहुमती प्रजा आन्दोलनेऽस्मिन् न निबद्धा । कृषकानां साहाय्यमपि एते न प्राप्स्यन्ति । एतानि आन्दोलनानि शक्तहस्तेन दमयंतु । जनानाम् उद्बन्धनं करोतु, स्मरतु एषः भवतां वाईसरोयमहोदयस्य प्रतिष्ठाप्रश्नः अस्ति ।"

लोर्डकर्झनस्य व्याख्यानस्य वार्ता केषाञ्चन क्रान्तिवीराणां कर्णेषु संप्राप्ता । सशस्त्रक्रान्त्यर्थं बङ्गालः प्राक् एव जागृतः आसीत् । क्रान्तिवीराः सशस्त्रशिक्षणेन सज्जाः आसन् । १९०२ वर्षे क्रान्तिमण्डलानि स्थापितानि आसन् ।

मेदिनीपुरेऽपि तादृशमेकं सङ्घटनं प्रस्थापितमासीत् । सत्येन्द्रनाथः तस्य सञ्चालकः । मेदिनीपुरं तु द्वन्द्वयुद्धस्य समराङ्गणम् अभवत् । गुप्तरीत्या अरण्येषु धनुर्विद्यायाः प्रशिक्षणं

प्रारब्धम् आसीत् । सत्येन्द्रनाथस्य गृहं क्रान्तिवीराणां प्रवृत्तेः केन्द्रम् अभवत् ।

कलिकत्तातः परिवर्त्य खुदीरामप्रफुल्लौ सत्येन्द्रनाथेन मिलितवन्तौ ।

गुरुदेव! आवां मिलितवन्तौ इति खुदीरामेण उक्तम् । "किन्तु कविवरः अहींसकक्रान्तेः आग्रहं करोति, परन्तु अहिंसायां मम श्रद्धा न ।"

अस्यार्थः भवतः शस्त्रे श्रद्धा वर्तते । श्रृणु खुदीराम, शास्त्रैव दण्डसाधनम्, शस्त्रेणैव शत्रु हन्यते , शस्त्र सामर्थ्यप्रतीकम् सत्येन्द्रनाथः वदति स्म । भवन्तौ आगच्छताम्, अहं भवद्भ्यां मातुः दर्गायाः समक्षं शस्त्रदीक्षां समर्पयामि । सत्येन्द्रबाबुः तौ दुर्गाप्रतिमायाः समक्षम् आनीतवान् ।

प्रणामाञ्जलिं कृत्वा नेत्रे निमील्य खुदीरामः प्रोवाच - "मातः दुर्गे ! अहम् अद्य आत्मानं स्वान्त्र्ययज्ञाय समर्पयामि, गौरवं च र क्षिष्यामि, एवञ्च प्राणान्तेऽपि गुप्तसूचनाः न प्रकटयिष्यामि इति ।"

प्रफुल्लः अपि प्रतिज्ञां कृतवान् - "अहं प्रफुल्लचाकी अद्य क्रान्त्यर्थं दीक्षाग्रहणं करोमि । मातः दुर्गे, त्वं साक्षी असि । अहं स्वातन्त्र्ययज्ञाय समर्पितः अस्मि ।"

सत्येन्द्रनाथः एकेन श्वासेन उक्तवान् - "इदानीं भवन्तौ बङ्गालक्रान्तिवीरमण्डलानां सदृशौ स्तः, अद्यारभ्य भवतोः शरीरं यथा वज्रायेत तथा यत्नः करणीयः । शरीरं सशक्तं करणीयम्, स्नायवः लोहमयाः करणीयाः, धनुर्विद्या पठनीया, भुशुण्डिः चालनीया ।"

खुदीरामप्रफुल्लौ अष्टमासस्य प्रशिक्षणं प्राप्तवन्तौ । अनन्तरं तयोः हस्ते भुशुण्डिः प्रदत्ता ।

शस्त्रं सदा दरिद्र-निराधार-चारित्र्य-शील-मातृभूमिमुक्त्यै उपयुज्यते । सत्येन्द्रनाथः उक्तवान् - "अद्यारभ्य इतिहासस्थ राजनीतेः च शिक्षणं प्राप्तव्यम् भवद्भ्याम् । विश्वराजनीतेः इतिहासः अपि अत्यावश्यकः । विश्वे के के क्रान्तिवीराः अभवन् ? तैः किं किं कार्यम् कृतम् ? किमर्थं ते बलिदानं दत्तवन्तः ? इत्यादि ज्ञानेन विना भुशुण्डिः मिथ्या एव । "

समस्तबङ्गभूमौ क्रान्तिदलशाखाः जालवत् प्रसृताः । क्वचित् विकीर्णसामग्रीकेन्द्रे, क्वचिद् चिकित्सालये, क्वचिद् गृहोद्योगे, क्वचिद् वस्तुभण्डारे क्रान्तिदलस्य कार्यं ग्रामे ग्रामे

केनचित् व्याजेन प्रारब्धम् आसीत् ।

मेदिनीपुरे वस्त्रसीवनाय तुरीम् उद्घाट्य क्रान्तिवीराः वस्त्रसीवनं प्रशिक्षणं लोकेभ्यः प्रददति स्म । तथा गुप्तरीत्या क्रान्तिप्रवृत्तयः अपि तैः प्रचाल्यन्ते स्म ।

मेदिनीपुरे क्रान्तेः मुख्यं स्थानं सत्येन्द्रनाथस्य गृहम् आसीत् । अत्र क्रान्तिवीराणां कृते आदेशाः, व्यूहरचना, जनानां नियुक्तिः, नूतनानां प्रवेश प्रक्रिया इत्यादयः कार्याणि भवन्ति स्म । अत्रैव शस्त्रसमूहस्य सुरक्षा भवति स्म । क्रान्तिवीराः एतस्य गुप्तकेन्द्रस्य नाम स्थापितवन्तः - आनन्दमठ इति ।

केन्द्रेऽस्मिन् खुदीरामप्रफुल्लौ प्रशिक्षणं प्राप्तवन्तौ । किमपि कार्यं कर्तुं तौ सज्जौ आस्ताम् । साहसकार्याय प्रतीक्षमाणौ आस्ताम् ।

मेदिनीपुरे १९०६ तमस्य वर्षस्य फेब्रुआरीमासे एकं विशालं पुस्तकप्रदर्शनं सञ्जातम् । अस्मिन् प्रदर्शने एतादृशानां वस्तूनां प्रदर्शनमासीत् तेन विदेशात् समागताः अङ्ग्रेजराज्यकर्तारः भारतं साहाय्यं कृतवन्तः इति आभासः भवेत् । प्रदर्शनमिदं द्रष्टुं बहवः जनाः समागताः ।

सत्येन्द्रनाथेन सोनार बङ्गला इति पुस्तिका मुद्रिता आसीत् । अस्य पुस्तकस्य लेखनं शासनस्य कृते असिधारासमम् आसीत् । वन्दे मातरम् इत्यस्य उल्लेखः आसीत् । हिन्दुस्तानस्य उपरि ब्रिटिशशासनस्य अत्याचाराणां तेजोमयभाषया तत्र लेखनम् आसीत् ।

जनपदसमाहर्ता मुद्रितस्य अस्य पुस्तकस्य विषये ज्ञातवान् । मुद्रणालयात् पुस्तकानि स्वीकृत्य ढाकां प्रतिगच्छतां क्रान्तिवीराणाम् आरक्षकैः निगडनं कृतम् । पुस्तकयूथमपि गृहीतम् । मुद्राणालयस्य स्वामी अपि गृहीतः । सः सर्वमपि भणितवान् । अतः प्रदर्शने पुस्तकानां विक्रयणं शक्यं न आसीत् ।

कार्यमेतत् करिष्यामि इति खुदीरामेण उक्तम् । भवतु नाम साहसः, साहसेन विना बङ्गभङ्गः नैव भविष्यति । मातृभूमये समर्पिताः वयम् । भयं किमर्थम् ? मम हस्ते भुशुण्डिं ददातु, अहं निर्भयः अस्मि ।

अन्येद्युः प्रातः खुदीरामः स्वकार्यं स्वीकृतवान् । प्रदर्शनस्य एकस्मिन् प्रकोष्ठे

मौनं स्थित्वा पुस्तिकायाः वितरणम् आरब्धवान् । प्रदर्शनं विलोकयत्सु केचन जनाः ईंग्लेडस्य राजानं प्रति निष्ठां स्थायपन्ति स्म । अतः ते अस्य युवकस्य विरोधं कृतवन्तः । वन्देमातरम् , स्वतन्त्रता, स्वराज्यम्, इत्यादयः स्वराः सूचीवत् तुदन्ति स्म । ते पुस्तिकायाः वितरणं कुर्वन्तं छात्रम् दृष्टवन्तः । ते जनैः अयं बालः तर्जितः । तेषाम् उपेक्षां कृत्वा बालकः आत्मनः कार्यं कुर्वन् आसीत् । आरक्षकेन बालकः गृहीतः । तस्मात् पुस्तकान्यपि गृहीतवन्तः । सः बालकः तं नोदयित्वा स्वहस्तं मोचितवान् । अनन्तरं हस्तं भ्रामयित्वा आरक्षकस्य नासिकायां मुष्टिप्रहारं कृतवान् । उवाच च - सावधान, मम स्पर्शं न करोतु । अहमपि पश्यामि यत् आरक्षकः अधिपत्रेण विना मम निगडनं कथं करोति ? इति यस्य आरक्षकस्य उपरि प्रहारः कृतः आसीत्, सः युगः अग्रे आगतः । किन्तु खुदीरामः न आसीत् तत्र । सः जनसमुदायात् अदृश्यः अभवत् । तथापि अनन्तरं सः खुदीरामं न्यगडत् ।

खुदीरामस्य निगडनविषये श्रुत्वा सत्येन्द्रबाबुः तत्र समागतः । एष उपरक्षाध्यक्षस्य पुत्रोऽस्ति इति असत्यम् उक्त्वा सः खुदीरामं मुक्तवान् । रक्षिस्थानकं गत्वा आरक्षकेन वृत्तान्तः श्रावितः तथा रक्षा निरीक्षकः चि(ारं कृतवान् - मूर्खम् उपरक्षाध्यक्षस्य नास्ति कोऽपि पुत्रः । धावतु, गृह्णातु तम् । किन्तु खुदीरामः पलायितः ।

खुदीरामस्य विरुद्धे अभियोगः कृतः आरक्षकैः । तस्योपरि राजद्रोहारोपः आरोपितः । खुदीरामः भूगर्भे आसीत्, किन्तु न्यायालये अभियोगः प्राचलत् । सत्येन्द्रबाबुः गूढपरीक्षणम् अभवत् । सर्वकारस्य दृष्टौ सः सन्देहात्मकः सम्भूतः । परिणामतः वृत्तिलोपः सञ्जातः ।

ततः सत्येन्द्रनाथः पूर्णकालिकः क्रान्तिवीरः अभवत् । मेदिनीपुरस्य क्रान्तिदलस्य समीपे जनाः आसन् किन्तु साधनानाम् अभावः वर्तते स्म, पुनश्च धनस्य न्यूनता । क्रान्तिवीरेभ्यः धनं दातुमिच्छुकाः धनिकाः अपि सङ्कोचम् अनुभवन्ति स्म सर्वकारगूढपरीक्षणत्वात् ।

धनस्य न्यूनतां दूरीकर्तुम् उपायः आसीत् सर्वकारकोशलुण्ठनम् इति ।

●●●

प्रकरणम् - ४

क्रान्तिवीराणां गुप्तगोष्ठी ।

मेदिनीपुरे क्रान्तिवीरसङ्घटनगुप्तसमितिकल्पना ज्ञानेन्द्रनाथेन कृता । सङ्घटनस्य अस्य मुख्यः उद्देशः आसीत् - ब्रिटीशशासनविरुद्धजनजागृतिः उत्पन्ना भवेत् इति । प्रारम्भे एतादृशानां सदस्यानां संख्या न्यूना आसीत् । एषा समितिः जनानां मध्ये गत्वा तान् बोधयितुं यतते मुष्टिमिताः जनाः अङ्ग्रेजाः तथापि भेदच्छेदकरणेन कथं देशं पराधीनं परतन्त्रं वा कृतवन्तः ? इति प्रजा संभूय यदि ब्रिटिशशासनस्य समक्षं सङ्घर्षं करोति चेत् सरलतया स्वातन्त्र्यं प्राप्स्यति ।

शनैः शनैः गुप्तसमितिसङ्घटने प्रसिद्धक्रान्तिवीरौ अरविन्दबारीन्द्रघोषौ अपि संयुक्तौ । अस्याः समितेः मुख्यं केन्द्रं कलिकतायां स्थापितम् । मदिनीपुरे सत्येन्द्रनाथः अस्याः सञ्चालनं करोति स्म । तेन खुदीरामः एवम् अन्ये युवकाः सक्रियसदस्याः कृताः । खुदीरामः समितिद्वारा उपलब्धसंपूर्णसाहित्यं पठितवान् ।

वर्षाऋतौ वृष्टिवशात् जनार्दनपुरे भयङ्करः आप्लवः आगतः । वार्तां श्रुत्वा खुदीरामः युवकैः सह जनानां साहाय्यार्थं तत्र प्राप्तवान् । खुदीरामेण दृष्टम् - जनाः, बालकाः, वृद्धाः, जलावृत्ताः । तेषां यदि स्थानान्तरं न क्रियते चेत् मरणं निश्चितमेव । खुदीरामः तरणं जानाति स्म । सः मित्रैः सह जले न्यपतत् । जलावृत्तान् बालकान् वृद्धान् स्कन्धे संस्थाप्य सुरक्षिते स्थाने प्रापितवान् ।

भीषणे आप्लवे जनानां गृहसामग्री प्रवाहिता । भोक्तुं नासीत् किमपि । केषाञ्चन जनानां समीपे वस्त्राणि अपि न आसन् । जनान् सुरक्षितं स्थानं प्रापय्य सः मित्रैः सह मेदिनीपुरं प्रत्यागतः । आप्लवपीडितानां कृते खुदीरामः एकं मासं यापितवान् ।

खुदीरामस्य सर्वाभिः गतिविधिभिः अपरूपादेवी, आवुत्तः, भागिनेयः ललितः इत्यादयः पीडिताः आसन् । अपरूपादेवी जानाति स्म भ्राताः खुदीरामः मद्धस्तात् निर्गतः इति सा ज्ञातवती यत् खुदीरामः कस्यैचित् संस्थायै कार्यं कुर्वन् अस्ति । तस्याः चिन्ता वर्धिता । तस्याः पतिः अपि श्यालस्य खुदीरामस्य गतिविधिं ज्ञातवान् । सः तस्मात् मुक्तिम्

इच्छति स्म । सत्येन्द्रबाबुमहोदयस्य विषयेऽपि सः ज्ञातवान् । खुदीरामस्य तेन सह सम्बन्धः तस्मै न अरोचयत् । किन्तु सः खुदीरामः किमपि वक्तुं न शक्तवान् ।

बङ्गालखण्डविभाजनं जात्याधारितम् आसीत् अङग्रेजानां हिताय च । सर्वकारेण हिन्दुमुसलमानयोः भेदभावनां कर्तुं तादृशी नीतिः आरब्धा येन बहुकालयावत् शासनं कर्तुम् , अत्याचारं कर्तुं शक्यते । धार्मिक-उन्मादम् उत्पाद्य स्वशासनमूलं दृढं कर्तुं योजना आसीत् अङ्ग्रेजानाम् ।

येषु दिनेषु बङ्गविभाजनस्य घोषणा अभवत्, तेषु दिनेषु खुदीरामबोझः बाङ्कुरायाः कृषकस्य समीपे स्थित्वा ग्राम्यजीवनं द्रष्टुम् अनुभवं प्राप्नोति स्म । अनन्तरं तस्य जीवने झटिति परिवर्तनम् आगतम् । सः गुप्तसमितेः सदस्यः एवं सत्येन्द्रनाथस्य प्रियपात्रम् अभवत् ।

बङ्गविभाजनविरोधे नैके राष्ट्रीयनेतारः भाषणं दत्तवन्तः । विदेशीवस्तुबहिष्कारस्य कार्यक्रमाः आयोजिताः । खुदीरामः दत्तेन सह सत्येन्द्रनाथस्य अनुमत्या मेदिनीपुरे तथा पार्श्ववर्तिनीक्षेत्रे विविधान् कार्यक्रमान् आयोजितवान् । गृहं गृहं गत्वा विदेशीवस्तुबहिष्कारविषये बोधयति स्म । क्वचित् सभारूपेण भाषणमपि प्रदत्तम् । लोकसमूहं वीक्ष्य तस्य मनोबलं दृढतरं भवति स्म ।

गुप्तसमितेः सर्वे सदस्याः एकदा सूचिताः यत् रात्रौ एकस्मिन् गृहे सर्वेषां मेलनं भवेत् इति । तत्सदनम् आसीत् सत्येन्द्रनाथस्य सहकर्मचारिणः पुनश्च रिक्तम् । सर्वेऽपि क्रान्तिवीराः नववादने तत्राहूताः आसन् । सर्वे सूचिताः आसन् यत् एकाकी चलित्वा आगन्तव्यमत्र, यत्र आरक्षकः न शङ्कां कुर्यात् ।

उपवेशने सत्येन्द्रनाथः उक्तवान् - मया भवन्तः सूचयितुम् आहूताः बङ्गभङ्गविरोधेन विदेशीवस्तुबहिष्कारेण सर्वकारः सचेताः सञ्जातः । अतः वयं सावधानाः स्याम ।

सत्येन्द्रनाथः प्रोवाच - इदानीं भवन्तः विभिन्नस्थलानि गच्छन्तु । अनन्तरं जनानां मध्ये गुप्तस्वरूपेण गत्वा युवकेषु ब्रिटिश - शासनविरुद्धे जागृतिम् उत्पादयन्तु । न भवति सफला क्रान्तिः जनसहयोगेन विना । जनक्रान्तिः ब्रिटीश-शासनं मर्दयितुं शक्नोति ।

वयं सर्वे भवद्भ्यः दिशादर्शनम् इच्छामः, आज्ञापयतु भवान्, अस्माभिः कुत्र

गन्तव्यम् इति सर्वे एकस्वरेण उक्तवन्तः ।

कस्य क्रान्तिवीरस्य गमनं कुत्र अस्ति इति सूचितवान् सत्येन्द्रनाथः । विशेषतः खुदीरामः कोटाईतामुलकं च प्रति तथा बङ्गलात् बहिः उडीसायाः कानिचित् स्थलानि प्रति प्रेषितः । अनन्तरं सभा समाप्ता ।

•••

प्रकरणम् - ५

खुदीरामस्य कोटाईतामुलकयात्रा ।

बङ्गालस्य कोटाईतामुलकम् इत्यादिक्षेत्रेषु तथा उडीसायाः बरसुआ - बाकोट - देवगढ इत्यादिस्थलेषु समितेः उद्देशप्रचारकार्यं तथा क्रान्तिवीरगतिविधिविस्तारकार्यं खुदीरामाय प्रदत्तम् । विशेषमार्गदर्शनाय खुदीरामः सत्येन्द्रनाथेन मिलितवान् ।

एकदा खुदीरामः गुरोः सत्येन्द्रनाथस्य आशीर्वादं स्वीकृत्य निर्गतवान् । खुदीरामं नगरस्य सीमान्तं प्रापयितुं स्वयं सत्येन्द्रनाथः गतवान् आसीत् ।

खुदीरामः अल्पदिनेभ्यः प्राक् एवम् उक्त्वा पादत्राणं पादरक्षां च त्यक्तवान् यत् - यावत् हिन्दुस्तानं ब्रिटीशशासनात् मुक्तं न भवेत् तावद् अहं पादरक्षां न धरिष्ये ।

चलन्नपि पुनः एकवारं सत्येन्द्रनाथः खुदीरामम् अवबोधितवान् यत् - खुदी ! त्वं पुनः स्वनिर्णयोपरि चिन्तय । तव गमनं निर्जनमार्गे अरण्ये च भविष्यति यावद् लक्ष्यं न प्राप्नुमः, तावत् अस्माभिः शरीरं संरक्षणीयम् ।

खुदीरामः राणाप्रतापस्य प्रतिज्ञायाः उदाहरणं दत्त्वा सत्त्येन्द्रनाथं तूष्णीं कृतवान् ।

मित्रैः सह कतिपयदिनानि वार्तालापात् अनन्तरं खुदीरामेण ज्ञातं यत् - एते सर्वे देशास्वतन्त्रतायै प्राणत्यागतत्पराः सन्ति तदा सः तत्रागमनस्य उद्देशं स्पष्टीकृतवान् । खुदीरामः तद् दृष्ट्वा आश्चर्यचकितः सञ्जातः यत् स्वसीमितसाधनैः स्रोतोभिः अपि तामुलकस्य षड्युवकाः क्रान्तिकारिगतिविधिषु संलग्नाः अभवन् ।

तामुलके खुदीरामः पञ्चदशदिनानि न्यवसत् । तत्र सप्तदशयुवकाः आसन् । तेभ्यः सः छुरिका-करवालभुशुण्डीनां प्रशिक्षणं दत्तवान् । खुदीरामः तेभ्यः क्रान्तिसाहित्यविषये प्रबोधितवान्, पठनाय मार्गदर्शनमपि दत्तवान् । विशेषतः यानि पुस्तकानि खुदीरामेण पठितानि आसन् तानि पुस्तकानि पठितुं मार्गदर्शनं दत्तवान् ।

खुदीरामः तामुलके गुप्तसमितिं संस्थापितवान् । षोडशतमे दिने सः कोटाई गतवान् । कोटाईमध्ये सः अधिकं स्थितवान् यतः स्थानमिदं नूतनम् आसीत् तस्य कृते ।

मधुसूदनहाल्दारस्य परिचयः सत्येन्द्रनाथेन प्रदत्तः आसीत् । मधुसूदनः सामान्य-वृत्तिं करोति स्म । वस्तुतः हल्दाराय क्रान्तिकारिगतिविधिः न अरोचत । सत्येन्द्रनाथेन हल्दारस्य नाम्ना एकं पत्रं विलिख्य खुदीरामाय दत्तम् । पत्र लिखितम् आसीत् यत् खुदीरामः कस्मैचित् विशेषकार्याय कोटाईमध्ये अल्पदिनानि निवासाय आगतवान् । यदि सुविधा स्यात् तर्हि सः खुदीरामाय वासं कर्तुं स्वगृहे स्थानं दद्यात् ।

मधुसूदनहाल्दारस्य कनिष्ठः भ्राता रोबीनसूदनहाल्दारः आसीत् । खुदीरामः तस्य प्रकोष्ठे निवसति स्म । तृतीये दिवसे रोबिनसूदनः बहिः गतवान् । खुदीरामः एकाकी प्रकोष्ठे उपविष्टः आसीत् तदा तस्य दृष्टिः वातायनस्य समीपस्थानां पुस्तकानाम् उपरि अपतत् । एतानि पुस्तकानि विवेकानन्द-बंकिमबाबुसाहित्यस्य आसन् । तेन खुदीरामेण चिन्तितम् - राबिसूदनः अस्मदीयः स्यात् इति । रोबीनसूदनस्य आगमनानन्तरं कृतायां चर्चायां सः अस्मदीयः इति स्पष्टम् । खुदीरामः अवगतवान् इदानीं कोटाईयात्रा निरर्थका न भविष्यति इति ।

ततः खुदीरामः बोद्धः रोबिसूदनाय स्वयात्रायाः उद्देश्यं स्पष्टीकृतवान् । अन्येद्युः रोबिसूदनः मित्रैः सह खुदीरामस्य परिचयं कारितवान् । खुदिरामः रोबिसूदनं तथा मित्राणि कोटाईतः एकं क्रोशं दूरं सुरक्षितं स्थानं प्रति नीतवान् । अत्र नासीत् आरक्षकस्य भयं नासीत् च वनपशूनां भयम् । खुदीरामः घण्टात्रयं यावत् तैः सह नानाविधविषयेषु चर्चां कृतवान् । तदा सः ज्ञातवान् यत् एते मातृभूमये प्राणत्यागं कर्तुं सिद्धाः । अनन्तरं शस्त्राणां प्रशिक्षणं चिन्तितवान् । भावियोजनायां निश्चितं यत् कोटाईक्षेत्रे रोबिसूदनः समितेः कार्यं द्रक्ष्यति ।

समये समये सः मेदिनीपुरं गत्वा सत्येन्द्रनाथात् खुदीरामेण सह मार्गदर्शनं प्राप्स्यति । कोटाईवासान्तरे खुदीरामः अङ्ग्रेजानाम् अत्याचाराणां विषये कतिपयघटनाः श्रुतवान् । एकां घटनां तु सः स्वयं दृष्टवान् । तदनुसारं खुदीरामः रोबिसूदनेन सह कोटाईक्षेत्रस्य मुख्यमार्गोपरि गच्छन् आसीत् । समक्षं जिल्लान्यायाधीशस्य वाहनम् आगच्छत् आसीत् । रथवाहः महोदयस्य प्रसन्नतायै शीघ्रं घोटकान् धावयति स्म । सहसा सः चालकः समक्षं समागतां वृद्धां मार्गे दृष्टवान् । रथवारणाय सः कशां बलपूर्वकं कर्षितवान् । अङ्ग्रेजः तथा तस्य पत्नी धर्षितवन्तौ । अतः अङ्ग्रेज-अधिकारी तस्यै कुपितः । वृद्धायाः मस्तके

अक्षतैः पूर्णपात्रम् आसीत् । मार्गे अक्षताः विकीर्णाः अभवन् । रथात् अवतीर्य सः चालकात् कशां स्वीकृत्य वृद्धायाः उपरि प्रहारं कर्तुम् आरब्धवान् । कशाप्रहारेण पीडिता सा मूर्छां प्राप्तवती । अङ्ग्रेजः चालकाय कशां दत्त्वा पुनः रथे उपविष्टवान् ।

दृश्येन अनेन खुदीरामस्य हृदये अङ्ग्रेजसर्वकारं प्रति घृणायाः भवाः पूर्वतः अपि वर्धितः । एकं क्षणं तूष्णीं बभूव । रोबीसूदनेन सह सः वृद्धां चिकित्सालयं नीतवान् । अनन्तरं वृद्धां गृहं प्रापितवान् । यावत् सः कोटाई क्षेत्रं स्थितवान् तावत् सः वृद्धायाः स्वास्थ्यं पृच्छति स्म ।

कोटाईक्षेत्रस्य त्यागकाले खुदीरामः रोबिसूदनं तथा मित्राणि सूचितवान् यत् वृद्धायाः निभालनं कर्तव्यम् ।

अनन्तरं खुदीरामः बेरसुआ-बारकोट-देवगढ-इत्यादिस्थानानि प्रति प्रस्थितवान् । सः प्रसन्नः आसीत् यतः इदानीं पर्यन्तं तस्य यात्रा सफला आसीत् । उत्साहेन सः कोटाईक्षेत्रं त्यक्तवान् तस्मिन् प्रबलः आत्मविश्वासः उत्पन्नः आसीत् । सः विचारयति स्म - इदानीं सः श्रेष्ठातिश्रेष्ठं कार्यं कर्तुम् अर्हति इति ।

खुदीरामः उडीसायाः कतिपयेषु स्थलेषु मासद्वयं यावत् भ्रमणं कृत्वा युवसङ्घटनकार्यम् अस्त्र-शस्त्रप्रशिक्षणकार्यं च चकार । यत्र कुत्रापि वासं कुर्वन् सः युवकानां दलम् एकत्रीकृत्य एकान्ते मातृभूमये प्राणबलिदानाय प्रेरितवान् । अभियानेऽस्मिन् सः युवकान् विदेशीवस्तूनां त्यागविषये बोधयितुं न विस्मरति स्म ।

खुदीरामस्य अत्र प्रयासः भवति स्म यत् सर्वजातीनां सर्वधर्माणां सर्वेऽपि युवकाः अभियाने प्रशिक्षणं प्राप्नुयुः । सर्वेषां हृदि देशभक्तिः जागृता भवेत् इत्यपि तस्याशयः । स्वस्मिन् कार्ये खुदीरामः सफलतां प्राप्तवान् । ग्रामीणयुवकानाम् उपरि खुदीरामस्य एन्द्रजालिकं प्रसृतम् । तस्य वेशभूषा तत्र विशेषसहायिका आसीत् ।

एवं खुदीरामः नैकेषु स्थलेषु यात्रां कृत्वा मेदिनीपुरं प्रत्यागतवान् ।

●●●

प्रकरणम् - ६

किंग्सफोर्ड मारयतु ।

एकस्मिन् दिवसे खुदीरामः उडीसायाः सीमावर्तिनीक्षेत्राभियानयात्रां सफलतापूर्वकं पूर्णां कृत्वा प्रत्यागतवान् । खुदीरामः साक्षात् गृहं गतः तदा तेन ज्ञातम् - अपरूपादेवी बालकैः सह श्वसुरगृहं हाटगछियां गतवती । गृहे आवुत्तः मिलितः किन्तु तस्य व्यवहारः सम्यग् न आसीत् । सः खुदीरामं पृष्टवान्

"किं त्वं निवेदयिष्यसि यत् एतावन्ति दिनानि कुत्र तिरोहितः आसीः ?"

आवश्यक - कार्यार्थं गतवान् आसम् - खुदीरामेण संक्षेपेण भणितम् ।

आवुत्ताय न अरोचत । उच्चस्वरेण सः खुदीरामम् उक्तवान् ।

आवश्यक - कार्यार्थं गतः स्यात्, किन्तु गृहजनान् अपि न सूचितवान्, अहं ज्ञातुं शक्नोमि यत् किम् अत्यावश्यकं कार्यम् ?

प्रत्येकवस्तुनः ज्ञानं गृहजनानां कृते अनावश्यकम्, न च हिताय - नम्रस्वरेण निवेदितं खुदीरामेण ।

खुदीरामः तुष्णींभूय स्वसामग्रीं व्यवस्थितं करोति स्म तदा आवुतः उत्थाय, पादप्रहारं च भूमौ कृत्वा गदितवान् - मौनेन कार्यं न भविष्यति, अहं तु उत्तरम् अपेक्षे ।

कदाचित् अहम् उत्तरं न ददामि चेत् .... । खुदीरामः उवाच ।

तव सदृशेन अवरबालकेन गृहं सदा त्यक्तव्यम् ।

पुनः स्यूतं सिद्धं कृत्वा गृहात् निर्गतः सः सत्येन्द्रनाथस्य गृहं प्राप । समयेऽस्मिन् नासीत् गृहे सत्येन्द्रनाथः । प्रतीक्षानन्तरं सत्येन्द्रनाथजी समागतः । तं वीक्ष्य खुदीरामः प्रहृष्टः ।

प्राप्तश्रमः रुग्णः खुदीरामः प्रोवाच - "ज्येष्ठ ! प्राक् मत्कृते स्नानाय भोजनाय च व्यवस्थां करोतु । अहं बुभुक्षितः अस्मि । अनन्तरं सर्वं निवेदयिष्यामि ।"

खुदीरामः सर्वं निवेदितवान् ।

"तर्हि एवं वर्तते - त्वं साक्षात् अत्रागतः असि । अपरूपा तव गमनेन दुःखिता आसीत् । सत्यं खुदीराम तव भगिनी देवी वर्तते ... नूनं भारतीया नारी.... कियद् विशालं हृदयं प्राप्तमस्ति अपरूपादेव्या ।"

सत्येन्द्रनाथस्य मुखात् प्रशंसां श्रुत्वा खुदीरामस्य नेत्रे विनते अवभताम् । एकदा तव आवुत्तः अपि मत्समीपम् आगतवान् आसीत् । अधिकं वदति स्म माम्......

किं वदति स्म ? इति खुदीरामः जिज्ञासुः अभवत् ।

सः तव आवुत्तः न, अपि तु पालनकर्ता, तस्य चिन्ता क्रोधः च उचितः । सर्वेऽपि पितरः इच्छन्ति यत् अस्य बालकः भणित्वा - गणयित्वा पदवीं प्राप्नुयात्, नास्ति आवुत्तमहोदयस्य दोषः अत्र ।

खुदीरामः अनन्तरं भोजनविधिं समाप्य सत्येन्द्रनाथं स्वस्य सफलयात्रायाः प्रारम्भात् अन्तावधि वर्णनं कृतवान् ।

तं विहाय ये कार्यकर्तारः प्रवासं कृतवन्तः तेषां प्रगतिः अधिकं न आसीत् । सर्वेऽपि स्वक्षेत्रात् सार्धैकमासानन्तरं प्रतिवृत्ताः । तेषां सङ्घटनस्य अभावः आसीत् । तव सदृशाः गुणाः सर्वेषु न भवन्ति । तथापि मम चिन्तायाः विषयः अयं न - सत्येन्द्रनाथः उक्तवान् ।

ततः किम् ? - उत्सुकतया खुदीरामेण पृष्टम् ।

विशेषरूपेण मम चिन्तायाः विषयः वर्तते यत् समितौ धनमञ्जूषा समाप्ता । अभियानैः शस्त्रक्रयणेन धनमञ्जुषा संपूर्णा रिक्ता सञ्जाता । एवं च एतस्मिन् विषये यदि न चिन्तयामः तर्हि इदानीं पर्यन्तं यत्किमपि अस्माभिः कृतं तत्सर्वं व्यर्थं भविष्यति । तव मित्राणां यात्रायाः असफलतायाः एकं कारणम् एतत् अपि आसीत् । ते यत्र गताः तत्र वासाय प्रश्नः आसीत् । विना वासेन प्रचारः न सम्भवति ।

सत्यं - श्रुत्वा खुदीरामेण उक्तम् - इदानीम् आज्ञापयतु; अस्माभिः किं कर्तव्यम् अस्ति ?

सत्येन्द्रनाथेन उक्तं - सायङ्काले रफीकं स्वीकृत्य आगच्छतु ।

खुदीरामः बोड्गः सायं रफीकम् आहूय समागतः । रफीकस्य पादरक्षायाः आपणः आसीत् । समये समये समितये आर्थिकसाहाय्यम् अपि करोति स्म । यतः रफीकः कर्मठः देशभक्तः आसीत् । सत्येन्द्रनाथेन रफीकस्य पुरतः प्रस्तावः स्थापितः - रफिकभाई । एनं बालकं जानाति सत्येन्द्रनाथः खुदीरामं प्रति इङ्गितेन सूचितवान् ।

रफीकः हसित्वा उक्तवान् - विलक्षणः भवान् सत्येन्द्रबाबुजी..... नायकम् एतं कः न जानाति ?

एषः नायकः आद्यारभ्य भवता सह निवसिष्यति, तस्य आवुत्तेन तेन सह सम्बन्धः कर्तितः । भवतः या काऽपि बाधा स्यात् तर्हि इदानीं निवेदय ।

सत्येन्द्रपितामह.... खुदीरामेण सह वासं कृत्वा अहम् प्रसन्नः भविष्यामि । भवान् प्रथमवारं सेवायाः अवसरं दत्तवान् अस्ति । रफिकः उवाच ।

तस्मात् दिनात् खुदीरामः रफीकस्य कुटुम्बसदस्यः अभवत् । रफीकस्य पत्नी कलिकत्तायाः अधिवक्तुः सैयद - अब्दुल-वहीदस्य भगिनी आसीत् । खुदीरामं सः भ्राता इव अवगच्छति स्म ।

खुदीरामस्य चिन्तायाः विषयः आसीत् समितेः केन्द्रियनिधिः वर्धितव्यः । सुहृद्भिः सह सः कार्येऽस्मिन् संलग्नः । किन्तु यावत् धनम् अपेक्षितम् आसीत् तावत् धनं न प्राप्तम् ।

एतेषु दिनेषु सत्येन्द्रनाथस्य वृत्तिः अपगता यतः उच्चाधिकारी ज्ञातवान् यत् सः सर्वकारविरुद्धं प्रवृत्तिं करोति । सत्येन्द्रनाथं वृत्तिकार्यात् निष्कासितवन्तः, अतः एव खुदीरामस्य वासव्यवस्था रफीकस्य गृहे कृता । खुदीरामः तस्य मित्रैः सह धनसङ्ग्रहः न जातः ।

ततः अन्येद्यु रात्रौ नववादने समितिसदस्याः गृहे एकत्रीभूताः । तत्र निर्णयः अभवत् यत् समित्या सह सद्भावयुक्तानां जनानां परिचयः भवेत् तथा यथायोग्य - साहाय्यार्थं प्रेरणीयाः ते ।

एतं विहाय अहम् एकं वक्तुकामः अस्मि - खुदीरामः उक्तवान् ।

आम्, वदतु ।

वयं सर्वकारीयधनसङ्ग्रहस्य लुण्ठनं कर्तुं शक्नुमः ।

परन्तु लुण्ठनेन धनसङ्ग्रहः अनुचितः, अनेन समितिः९ कलङ्किता भविष्यति - एकः क्रान्तिवीरः शङ्कां कृतवान् ।

"मन्ये लुण्ठनम् अनुचितम्, किन्तु व्यक्तिविशेषं न लुण्ठयामः, अहं तु सर्वकारीय राजकोषं लुण्ठयितुं वदन् अस्मि । ते अस्माकं देशवासिनाम् अधिकारान् आकुञ्च्य, संपत्तिं च लुण्ठित्वा स्वस्य मञ्जुषां पूरयन्तः सन्ति । ईंग्लेन्डस्य इतिहासोपरि यदि दृष्टिपातं कुर्मः चेत् ज्ञायते यत् एकस्मिन् समये तत्र पङ्कस्य मषकानां च साम्राज्यं वर्तते स्म । सर्वदृष्टया सः देशः पृष्ठे आसीत् । अद्य विश्वस्य सर्वान् देशान् वञ्चयित्वा विश्वस्य शिखरम् आरुढः सः । तादृशसर्वकारस्य राजकोषलुण्ठनम् मम दृष्ट्या अनुचितकार्यं न, पुनश्च धनस्य उपयोगं मातृभूमेः मुक्तये वयं कुर्मः ।"

खुदीरामस्य तर्कं श्रुत्वा सर्वेऽपि सहमतिं दर्शनवन्तः । सत्येन्द्रनाथेनापि स्वीकृतं यत् खुदीरामस्य कथनं योग्यम् । अनन्तरं सर्वे समितिसदस्याः उत्साहेन गुप्तरूपेण संपर्कं कृत्वा धनसङ्ग्रहं कुर्वन्ति स्म ।

खुदीरामः एकदा कमपि मित्रम् अनुक्त्वा मेदिनीपुरं त्यक्तवान् । विषयेऽस्मिन् न सत्येन्द्रनाथं, न च रफिकम् उक्तवान् । एकं मित्रं तेन सह स्वीकृतवान्, तस्य नाम आसीत् प्रफुल्लः चाकी ।

मेदिनीपुरं गत्वा सः भगिन्या मिलितवान् । हाटगछियायां सः कतिपयानि दिनानि वासं कृतवान् । तस्य आगमनस्य कारणं न भगिनी पृष्टवती, न च तेन स्पष्टता कृता । खुदीरामस्य भगिन्या सह अन्तिमं मेलनम् आसीत् ।

खुदीरामः हाटगछियायां स्थित्वा निरीक्षणं करोति स्म यत् पत्रालयस्य धनराशिं नीत्वा तत्रत्यः द्वारपालः कदा, कस्मिन् समये मेदिनीपुरं प्रस्थानं करोति ? एतत्सर्वमपि तेन ज्ञातं, पुनः मित्रेण सह लुण्ठनस्य स्थानमपि निश्चितं कृतम् ।

द्वारपालः यस्मात् मार्गात् पत्रालयस्य धनं स्वीकृत्य गच्छन् आसीत्, तस्मिन् मार्गे उद्यानम् आगच्छति स्म । उद्यानं हाटगछियातः दूरे आसीत् । आम्रवृक्षस्य अधः एका पथ्या आसीत् । वृक्षः विशालः गाढः च आसीत् । तस्य वृक्षस्य एका शाखा मार्गस्य उपरि प्रसृता आसीत् । खुदीराम मित्रम् अपरवृक्षस्य पृष्ठे स्थापितवान् । स्वयं शाखायाः उपरि यथा कोऽपि न पश्येत् तथा उपविष्टः । द्वारपालः मध्याह्ने ततः गच्छति स्म ।

तस्मिन् दिवसे द्वारपालः यदा शाखायाः अधः प्राप्तवान् तदा भयानकनादेन सह सः खुदीरामः तस्य उपरि अपतत् । द्वारपालः सशक्तः आसीत्, खुदीरामस्य सदृशं युवकं पराजेतुं शक्नोति स्म । एतावत् न तस्य समीपे परशुः अपि आसीत् । किन्तु भयानकरवेन खुदीरामः तस्य उपरि यथा उपतत् तेन द्वारपालः भयभीतः जातः । परशुः हस्तात् भ्रष्टः । खुदीरामः तस्य वक्षसि उपविष्टवान् । समयेऽस्मिन् खुदीरामस्य मित्रं विद्युद्गत्या आगतः, एवं पत्रालयस्य स्यूतं द्वारपालात् आकुञ्च्य, परशुं च स्वीकृत्य पलायितः । पलायमानं मित्रं दृष्ट्वा खुदीरामः उत्थाय, भुशुण्डिं च निष्काष्य उक्तवान् - उत्तिष्ठ, साक्षात् हाटकछियां प्रति पलायनं कुरु, अन्यथा गुलिकाप्रहारं करिष्यामि ।

खुदीरामस्य गुलिकाप्रहारस्य तर्जनं श्रुत्वा सः मस्तके हस्तं संस्थाप्य पलायितः । द्वारपालं पलायितं दृष्ट्वा खुदीरामः मित्रस्य समीपं प्राप्य उक्तवान् - इदानीं मेदिनापुरं प्रति पलायनं कुरु । यावत् द्वारपालः हाटगछियां प्राप्य आरक्षकं निवेदयेत् तावत् त्वं मेदिनीपुरस्य मार्गं पारं करिष्यसि इति । तत्र गत्वा निधिं सत्येन्द्रनाथाय यच्छ, पुनः वदिष्यसि यत् अहं शीघ्रं समागत्य मेलिष्यामि इति ।

अनन्तरं खुदीरामः चलित्वा गोपालगञ्ज प्राप्तवान् । तत्र रात्रिं यापयित्वा अन्येद्युः महापोते उपविश्य कलिकतां प्राप्तवान् । तत्र दिनद्वयं स्थित्वा मेदिनीपुरं समागतः । यदा सः सत्येन्द्रनाथेन मिलितः तदा सः प्रसन्नः अभवत् । अस्य मित्रम् निधिं स्वीकृत्य तत्र प्राप्तवान् आसीत् । सत्येन्द्रबाबुः खुदीरामम् आलिङ्गितवान् - खुदी, सर्वकारः तव अन्वेषणाय अहोरात्रं प्रयत्नं करोति । त्वं भूगर्भं गच्छ ।

खुदीरामेण मस्तकेन न उक्तम्

मस्तके वस्त्रपट्टिकाबन्धनान्तरं भयं कुतः ? सर्वकारः माम् गृहीत्वा अभियोगं

चालयिष्यति, अन्यद् किम् ? उत्बन्धनं करिष्यति, तावत् एव ।

सत्येन्द्रबाबुजी, सर्वकारः मम उद्‌बन्धनं यदि करिष्यति तर्हि क्रान्तिदावानलः हिन्दुस्ताने प्रज्वलिष्यति ।

एकः नूतनः लक्ष्यवेधी, क्रान्तिवीरः अस्माकं समीपम् आगतः - सत्येन्द्रनाथः उक्तवान् ।

फ्रान्से सः भुशुण्डिप्रशिक्षणं प्राप्तवान् अस्ति । विस्फोटकनिर्माणपद्धतिम् अपि सः जानाति । तस्य नाम हेमचन्द्रः कानूगो । त्वं तस्मात् विद्यां पठ ।

खुदीरामः हेमचन्द्रेण मिलितवान् । हेमचन्द्रः, खुदीरामः, प्रफुल्लः, इत्येतेषां त्रयाणां मैत्री सञ्जाता । प्रफुल्लखुदीरामौ हेमचन्द्रात् प्रशिक्षणं प्राप्तवन्तौ । अनन्तरं त्रयः अपि सत्येन्द्रनाथेन सह एकं प्राचीनं दुर्गं दीक्षार्थं प्राप्तवन्तः । तत्र अन्धकारः आसीत् । सत्येन्द्रनाथेन अग्निशलाका प्रज्वालिता । समक्षं खुदीरामेण कालीमातुः विग्रहः दृष्टः । सत्येन्द्रनाथः मातुश्चरणयोः पतितं दीपं प्रज्वालितवान् ।

सत्येन्द्रबाबुःकालिमातुः समक्षं नमस्कृत्य नेत्रे निमिल्य च स्थितवान् ।

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता

नमः तस्यै नमः तस्यै नमः तस्यै नमो नमः

अनन्तरं त्रयः अपि मातृपूजां कृतवन्तः ।

सत्येन्द्रनाथः अनन्तरं कर्गज् निष्काष्य त्रीन् श्रावितवान् । तत् क्रान्तिदलस्य प्रतिज्ञापत्रम् आसीत् । त्रयः वीराः आत्मनः रक्तेन पत्रोपरि हस्ताक्षरं कृतवन्तः ।

क्रान्तिदलस्य नेता यत्किमपि आज्ञापयति तस्य आचरणं कर्तव्यम् । यदा कश्चन् क्रान्तिवीरः सङ्कटे स्यात् तदा तस्य साहाय्यं करणीयम् । मातुः मुक्त्यर्थं स्वात्मार्पणं करणीयम् । प्राणान्तेऽपि क्रान्तिदलस्य वार्ता कस्मै अपि न कथनीया ।

इदानीं भवन्तः त्रयः क्रान्तिदलस्य सदस्याः अतः भवताम् उत्तरदायित्वं वर्धते - इति सत्येन्द्रबाबुः गदितवान् । तदानीं बङ्गभङ्ग आन्दोलनमपि पराकाष्ठां प्राप्तम् ।

विदेशवस्त्रापणान् ज्वालितवान् खुदीरामं गृहित्वा आरक्षका: प्रयतितवन्त:, किन्तु खुदीरामं न गृहीतवन्त: । एतस्मिन् समये लवणाधिनियम: आगत: । खुदीराम: गङ्गाया: जले ब्रुडनं कृत्वा लवणं स्वीकृत्य गच्छत: जलयानात् उत्स्थलीकरोति स्म । खुदीरामस्य पराक्रमम् अवलोक्य सत्यनाथस्य क्रान्तिवीरा: प्रोत्साहिता: भवन्ति स्म । षोडशवर्षीय खुदीराम: आरक्षकाणां निद्रां नाशितवान् ।

खुदीराम: यदा मेदिनीपुरस्य आरक्षकान् भ्रामयति स्म तदा कलिकत्तायां विशालम् एकं क्रान्तिदलं कार्यं करोति स्म । दलमिदं सर्वसम्पन्नम् आसीत् । तस्य समीपे शस्त्राणि, सशक्ता: कार्यकर्तार:, सङ्घटनं, धनं च आसीत् । दलस्य अस्य प्रमुखनेता अरविन्दघोष: आसीत् ।

तेषां क्रान्तिदलस्य मुखपत्रम् आसीत् वन्दे मातरम् इति । तस्मिन् देशनेतृणां भाषणानि प्रकाशितानि भवन्ति स्म । क्रान्तिवीराणां गाथा: प्रकाश्यन्ते स्म । अङ्ग्रेजानां कृते वन्देमातरम् शब्द: लवणकशाघात: इव भाति स्म । राष्ट्रीयरङ्गरञ्जितानि अन्यानि मुखपत्राणि अपि आसन् । तेषु वृत्तपत्रद्वयं प्रसिद्धमासीत् युगान्तरम्, सन्ध्या च ।

युगान्तरस्य ग्राहकसंख्या आसीत् सप्तसहस्रम् । त्रीणि पत्राणि बङ्गविभाजनस्य तथा शासनस्य कटु आलोचनां कुर्वन्ति स्म । वन्दे मातरम् अङ्ग्रेजीभाषायां प्रकाश्यते स्म । युगान्तरस्य संध्याया: च प्रकाशनं बङ्गाली-भाषया भवति स्म ।

लोर्डकर्जनेन त्रयाणामपि पत्राणाम् मुपरि राजद्रोहस्य आक्षेप: कृत: । कलिकत्ताया: प्रमुखन्यायाधीशस्य किंग्सफोर्डस्य न्यायलये अभियाग: अयं सम्प्राप्त: । किंग्सफोर्ड: अनन्य: शासकवादी आसीत् । बङ्गालस्य अव्यवस्था क्रान्तिवीरै: युवकै: कृता इति तस्य दृढा मान्यता आसीत् । किंग्सफोर्डस्य न्यायालये अभियोग: प्राचलत् । आरक्षका: विपिनचन्द्रं साक्षिरूपेण प्रस्तुतं कृतवन्त: ।

विपीनचन्द्र: देशभक्त: आसीत्, स: नयवादी तथा चाणक्य: अपि आसीत् । आरक्षकाणां साक्षी भूत्वा स: अरविन्दघोषं निन्दितवान् । किन्तु न्यायालयं प्रविश्य बिपीनबाबुपरिवर्तनम् जातम् । सिंहवत् स: निवेदितवान् -

"भवत: न्यायालय:, न्यायालय: न, श्रीमान् किंग्सफोर्ड ! यदि भवान् न्यायमन्दिरमिदं

न्यायमन्दिरत्वेन अवगच्छति चेत् भवतः मस्तकस्य विचारं करोतु इति । एतत् न्यायमन्दिरं न, नाटकस्य रङ्गमञ्चः अयम् । बहूनि नाटकानि मञ्चेऽस्मिन् अभिनीतानि । यस्मिन् किंग्सफोर्डस्य भूमिका वर्तते विदूषकस्य । एतादृशनाटकस्य रङ्गमञ्चे बिपीनचन्द्रः पालः निवेदनं कर्तुं न शक्नोति । अहं बिपीनचन्द्रः सर्वकारे न विश्वसिमि । वन्दे मातरम् ।"

न्यायमन्दिरे तथा बहिः बिपीनपालस्य जयघोषः अभवत् ।

क्रोधेन रक्तरञ्जितः किंग्सफोर्डः अधिकारिणः उक्तवान् न्यायालयस्य अवमानाय एव दण्डितः भविष्यति । अस्य भाषायां राजद्रोहः अस्ति । तं कारागारं प्रति नय ।

अरविन्दघोषः मुक्तः, किन्तु बिपिनपालस्य कारावासः । जनाः कुपिताः अभवन् । बहिः वन्दे मातरम् इति घोषणाम् आरब्धवन्तः जनाः । आरक्षकैः दण्डप्रहारः कृतः । जनानाम् इतस्ततः धावनम् आरब्धम् । तत्र एकः किशोरः गर्जितवान्

वन्दे मातरम् ।

शट - अप !

वन्दे मातरम्

आंग्लाधिकारी दण्डम् उद्गमितवान् । सुशीलसेनः वानरः इव कूर्दनं कृतवान्, अधिकारिणः हस्ते दन्तचिह्नं कृतवान् । अधिकारी किंग्सफोर्डस्य समक्षम् आनीतवान्

किंग्सफोर्डः गर्जितवान् - राजद्रोहः, प्रत्यक्षं पञ्चप्रहारात् कुर्वन्तु ।

नववर्षस्य बालकस्य सुशीलसेनस्य पृष्ठे प्रथमः प्राहारः अभवत् ।

वन्दे मातरम् - सुशीलसेनः उक्तवान् ।

द्वितीयः प्रहारः

वन्दे मातरम्

पञ्चवारं सः वन्दे मातारम् इति उक्तवान् । सः मूर्च्छां प्राप्तवान् । संध्यापत्रे संपादकः ब्रह्मबान्धवः उपाध्यायः किंग्सफोर्डाय कसाई काझी इति उपाधिं दत्तवान् । ब्रह्मबान्धवस्य

उपरि अभियोगः प्राचलत् । तदा चिकित्सालये तस्य मरणम् अभवत् ।

संपूर्णे बङ्गाले रात्रौ स्थाने स्थाने क्रान्तिवीराणां गुप्तगोष्ठ्यः अभवन् । सर्वत्र एकः एव प्रस्तावः पारितः -

किंग्सफोर्डं मारयतु ।

●●●

प्रकरणम् - ७

गच्छन्तु, माता दुर्गा युष्मभ्यं यशः प्रापयेत्

कलिकतायाः क्रान्तिदलं यदा किंग्सफोर्डस्य वधयोजनां करोति स्म तदा बारीन्द्रनाथः घोषः मेदिनीपुरस्य क्रान्तिवीरदलस्य गुप्तमेलनाय समागतः ।

सत्येन्द्रनाथः उत्साहेन स्वागतं कृतवान् । कानुगो - खुदीराम- प्रफुल्लानां परिचयं दत्तवान् ।

एतेषां त्रयाणाम् मम आवश्यकता वर्तते साहसिकानि कार्याणि मम हस्ते सन्ति ।

त्रयाणां समर्पणेन कृतार्थो भविष्यामि - सत्येन्द्रबाबुः उक्तवान् ।

वन्दे मातरम् - हर्षावेशेन त्रयः उक्तवन्तः ।

खुदीरामः साधुवेशे, प्रफुल्लः कुलीनावतंसवेशे कानूगो हस्ते बाईबल स्वीकृत्य ख्रिस्तधर्मगुरुवेशे रेलयाने उपविष्टवन्तः ।

कलिकत्तायां बारीन्द्रबाबुः सङ्कीर्णाभ्यः वीथीभ्यः तान् एकं जीर्णं प्राचीनं गृहं प्रति स्वीकृत्य प्राप्तवान् । सदनमिदं क्रान्तिवीराणां केन्द्रम् आसीत् । अत्रैव सर्वाः योजनाः संभवन्ति स्म । वस्त्रबन्धनं कृत्वा सर्वेऽपि क्रान्तिवीराः इतः आगच्छन्ति स्म । गृहस्य भूगर्भे विस्फोटकनिर्माणाय यन्त्रागारः आसीत् एवं च एकत्र शस्त्रागारः आसीत् ।

बारीन्द्रबाबुः सर्वेषां परिचयं दत्तवान् । अनन्तरम् एकस्मिन् प्रकोष्ठे उपवेशनम् अभवत् । किंग्सफोर्डस्य वधयोजनायाः संपूर्णदायित्वं खुदीरामाय दातव्यम् इति निर्णयः अभवत् । प्रकृतिः कदाचिद् अनुकूलं वातावरणं निर्माति, कदाचिद् प्रतिकूलम् । तस्य वधस्य योजना भवति स्म तदा एव किंग्सफोर्डस्य स्थानानन्तरणं कलकत्तातः मुजफरपुरम् अभवत् ।

क्रान्तिवीराः एकं लघुतीव्रविस्फोटकं निर्मितवन्तः । सुशोभितस्य स्थूलस्य ग्रन्थस्य पत्राणि विशीर्य विस्फोटकं सुस्थापितवन्तः । १२०० पत्राणां बृहद् पुस्तकम् आसीत् । तत्र ६०० पत्राणां यथा कोऽपि न जानीयात् अन्तः विस्फोटकः स्थापितः तथा कर्तनं कृतम् ।

कलिकत्तारेलस्थानके किंग्सफोर्डस्य प्रयाणसमये बहवः जनाः एकत्रीभूताः । तत्र माल्यार्पणम् अभवत् । उपहाराणां राशिः सञ्जातः ।

गन्त्र्याः प्रस्थानस्वरः यदा सञ्जातः तदा एकः सद्गृहस्थः शीघ्रं धावनं कृत्वा किंग्सफोर्डस्य उपवेशनस्थानम् उपसृत्य एकं सुन्दरम् उपहारं प्रददात् । समयेऽस्मिन् रेलयानस्य प्रस्थानम् अभवत् ।

किंग्सफोर्डः ओर्डर्ली तस्य उपहारस्य उद्घाटनाय उक्तवान् । ओर्डली यथोक्तं कृतवान् । विस्फोटकं दृष्ट्वा किमपि अविचार्य सः ग्रंथं बहिः क्षिप्तवान् । प्रचण्डः विस्फोटः सञ्जातः । दुष्टः किंग्सफोर्डः रक्षितः अभवत् ।

अन्येद्युः वृत्तपत्रेषु विस्तृतः आलेखः मुद्रितः अभवत् । किंग्सफोर्डस्य सुरक्षाव्यवस्था दृढा कृता । बारीन्द्रमहोदयस्य अध्यक्षतायां पुनः उपवेशनम् अभवत् ।

- किंग्सफोर्डः मारणीयः एव ।

द्वौ क्रान्तिवीरौ सन्नद्धौ कुरुताम् । तौ मुझफरपुरं प्रति प्रेषयताम् । किंग्सफोर्डस्य हत्यायाः उत्तरदायित्वं प्रदीयेताम् । तदर्थं खुदीरामप्रफुल्लाभ्यां संपूर्णम् उत्तरदायित्वं दत्तम् ।

खुदीरामः येषु दिनेषु कलिकत्तायाम् आसीत् तदा तत्र अधिवक्तुः सैयद - अब्दुलवहीदस्य भगिनी अपि आसीत् । मुजफरपुरप्रस्थानात् पूर्वं सः खुदीरामः तया मेलितुं गतः ।

केवलं मृत्युञ्जयः वीरः मृत्योः आह्वानं कर्तुं शक्नोति । स्वार्थी लुब्धः जनः कालस्य आह्वानं कर्तुं न शक्नोति । अभयत्वं, सरलं न , उग्रसाधना अपेक्ष्यते अभयत्वाय ।

सशक्तक्रान्तिमध्ये हिन्दुस्ताने बङ्गालः अग्रेसरः आसीत् । बङ्गालेन द्विधा उपासकाः देशाय प्रदत्ताः अहिंसकाः हिंसकाः च । बङ्गालः देशभक्तानाम् आकरः । रवीन्द्रनाथः चितरञ्जनदासः इत्यादयः देशभक्ताः अहिंसायाः उपासकाः । अरविन्दघोषः, बारीन्द्रघोषः, अवनीमुखरजी, खुदीरामबोझ, जनिनदासः, सूर्यसेनः, सुभाषचन्दरबोझः इत्यादि शस्त्राणाम् आराधनं कृतवन्तः ।

बङ्गालस्य क्रान्तीवीरेषु एकं नाम इतोऽपि आसीत् रासबिहारी घोषः ।

क्रान्तिवीराः सिंहौ खुदीरामप्रफुल्लौ आलिङ्गितवन्तः । कदाचित् अन्तिमं मेलनं स्यात् । सर्वेऽपि जानन्ति स्म एतौ कुत्र गच्छन्तौ स्तः । मातुः दुर्गायाः पूजां कृत्वा अर्घ्यं समर्पितवन्तौ ।

"हे दुर्गे, हे भगवति, त्वमेव माता भारती इति । त्वम् एव स्वातन्त्र्यदेवी । त्वम् एव असुरविनाशिनी काली । त्वया किमपि न वांछावः । आवाम् आत्मानं भवत्यै समर्पितवन्तौ । आवयोः स्वीकुरु । नेत्रे निमील्य खुदीरामः वदन् आसीत् ।"

"हे दुर्गे, तव स्वरूपात् प्रकटितं मातुः भारत्याः मानचित्रं पश्यन् अस्मि । तव विराटं स्वरूपं वीक्ष्य पुत्रोऽहम् । न क्षुत्तृषौ मे इदानीम् । तव दर्शनेन मम सर्वाः कामनाः परिसमाप्ताः ।"

खुदीरामः सिंहनादेन उवाच - वन्दे मातरम्

मह्यम् अनुमतिं ददातु, वारीन्द्रबाबुः , मातुः भारत्याः वस्त्राहरणकर्तॄन् छेत्स्यामि, कस्मात् अपि भयं नास्ति, अभयः अस्मि ।

बाबुजी, प्रफुल्लः चाकी नमस्कृतवान् ।

प्रतिश्रुतिः मातुः दुर्गायाः, रिक्तपाणिः न प्रतिवर्तिष्ये ।

वन्दे मातारम्

जयघोषः - वन्दे मातरम्

बारीन्द्रबाबुः स्वहस्तेन द्वयोः हस्ते भुशुण्डिं संस्थाप्य प्रयाणं कारितवान् ।

खुदीरामप्रफुल्लौ रेलयानेन प्रस्थितवन्तौ । द्वावपि सन्नद्धौ आस्ताम् । आवश्यकतानुसारं वेशपरिवर्तनाय वस्त्राणि अपि स्वीकृतानि आसन् । अन्यानि शस्त्राणि अपि शय्यायां तिरोहितानि आसन् । विस्फोटकाः अपि स्यूते आसन् । विषपुटकाः अपि द्वयोः कोशे आसन् । तौ नामपरिवर्तनमपि कृतवन्तौ । खुदीरामः दुर्गाप्रसादः इति नामधारणं कृतवान् । प्रफुल्लः दिनेशचन्द्रः सञ्जातः । द्वौ प्रशिक्षितौ आस्ताम् अतः न आसीत् दोषसम्भवः ।

•••

प्रकरणम् - ८

मुजफ्फरस्य तथा किंग्सफोर्डस्य फेटन (रथविशेषः)

१९०८ तमवर्षस्य एप्रिलमासस्य २८ दिनाङ्कः ।

यानात् अवतरणानन्तरं दुर्गाप्रसादः दिनेशबाबुः च स्व - स्ववस्तूनि उन्नीय रेलस्थानकात् बहिः आगतवन्तौ ।

दुर्गाप्रसादः एकं वृद्धम् अश्वशकटिकं स्थगितवान् । वस्तूनि शकटे सम्यक् स्थापयित्वा द्वौ अपि याने उपविष्टौ ।

"आवां द्वौ दूरात् आगच्छावः, एतत् नगरम् आवयोः कृते अपरिचितम् अस्ति । किमपि उत्तमं सुविधायुक्तं विश्रामगृहं प्रति नयतु । तत्र स्थातुं विचारः अस्ति" एवं दिनेशबाबुः शकटचालकं पृष्टवान् ।

मुजफरपुरे विश्रामगृहाणि द्वित्राणाम् अपेक्षया अपि अधिकानि सन्ति ।

चालकः उक्तवान् - "हिन्दु-धर्मशालाः सन्ति यवनानां यात्रिकालयाः अपि सन्ति । सम्पूर्णं राष्ट्रं क्रैस्तानाम् श्वेतवानराणाम् अस्ति ।"

दुर्गाप्रसादः चर्चाम् अग्रे चलितवान् "सत्यम् एव अस्ति । सः वानरः हिन्दुस्तानस्य वक्षःस्थलम् आरूढः । एताः तु राजकीयाः चर्चाः सन्ति । अनेन सह अस्माकं कः सम्बन्धः ?"

यवन - अश्वशकटचालकस्य अर्धपिहिते नेत्रे उद्घाटिते । "एषः अस्माकं देशः, कोटिशः हिन्दूनां देशः अस्ति, कोटिशः यवनानां देशः अस्ति । वयं सर्वे एकदा मिलित्वा एतान् वानरान् प्रतिप्रेषयिष्यामः । प्लासेः युद्धम् स्मरन्तु इतिहासं किञ्चिद् । वयं सर्वे भोगविलासे रताः आस्म, धनिकाः सर्वेऽपि मदिरापाने सुन्दरीषु च निमग्नाः आसन् । एकेन लघुपाषाणेन ताडनमेव करणीयम् आसीत् । एते वैदेशिकाः आगत्य एक लघुपाषाणखण्डम् एव क्षिप्तवन्तः । अनन्तरं हिन्दुस्थानस्य सम्पूर्णा भूमिः अधिकृता । वयं तदा आरभ्य पराधीनाः ।"

"अयि वानराणां सर्वकार ! अयि रक्तमुखीनां सर्वकार !" इति वदन् शकटचालकः निष्ठीवनं कृतवान् ।

"भवतः कथनं सत्यम् अस्ति" इति दुर्गाप्रसादः उक्तवान् ।

"परं वयमपि किं कर्तुं शक्नुयाम?"

"वयं सर्वमपि कर्तुं शक्नुयाम पन्तमहाशय !"

गुलाम - अलिः खड्गस्य तीव्रवेगवत् उत्तरं दत्तवान् - वयं त्रिंशत कोटी हिन्दुस्तानीयाः स्म, पुरतः केवलं सार्धैकलक्षाम् उत लक्षद्वयं वानराः सन्ति । वयं सर्वे यदि एकया अङ्गुल्या ताडयामः तर्हि अपि ते चूर्णीकृताः भविष्यन्ति ।

तर्हि वयं किमर्थं तथा न कुर्मः ? दिनेशबाबुः पृष्टवान् । गुलाम - अलिः किङ्कर्तव्यमूढः अभवत् ।

कारणं वयं जागरिताः न स्मः । दिनेशबाबुः अवदत् "अस्माकं कोटिशः देशवासिनः तु जानन्ति अपि यत् वयं लोहपाशैः बद्धाः पशुवत् जाताः स्मः । स्वातन्त्र्यम् अर्थात् किम् इति विचारः अपि तेषां मस्तिष्के इतोऽपि प्रविष्टः नास्ति ।"

भवतः कथनं सत्यम् अस्ति - गुलाम अलिः अवदत् ।

एतत् नग्नं सत्यम् अस्ति यत् वयं जानीमः वयं के इति ? एते श्वेतवानराः ज्ञात्वा एव अस्मान् अज्ञाने स्थापितवन्तः सन्ति । १८५७ तमस्य वर्षस्य अस्माकं वीरैः पूर्वजैः सह अस्मान् योजयन्तीं परम्परां ते मध्ये एव कर्तितवन्तः । वयं पूर्णतया अज्ञानान्धकारे स्मः वयम् अस्माकं पूर्वजानाम् उज्ज्वलम् इतिहासम् अपि न जानीमः । अर्थात् वयं जागृताः भवेम, प्रतिग्रामं स्वातन्त्र्यस्य मन्त्रं प्रसारयेम ।

किशोरीमोहनस्य धर्मशालायाः द्वारस्य पुरतः आगत्य अश्वः स्थगितः । एतस्यां धर्मशालायं बङ्गस्थानात् अन्यस्थानेभ्यः च आगन्तारः बङ्गालीभाषीजनाः वसन्ति स्म ।

दिनेशबाबुः अश्वशकटचालकाय भाटकम् अददात् ।

खानमहाशय ! भवान् एतेषां जनानां निवासस्थानानां विषये विवरणं न

दत्तवान् ।

अहं मम एतेन शकटेन एव भवदन्तं तत्र नीतवान् स्याम्, परन्तु मया मम पुत्रीं स्वीकर्तुम् अन्यग्रामः गन्तव्यः अस्ति । परन्तु एते सर्वेऽपि मिलित्वा एकत्र एव वसन्ति, कृष्णवर्णजनेभ्यः दूरम् । पश्यतु, तत्र पुरतः । तस्याः अधित्यकायाः पृष्ठतः तेषाम् आवासाः सन्ति । सर्वाणि भवनानि तत्रैव सन्ति । यद्यपि तेषां समितिः ततः किञ्चिद् दूरे अस्ति । इदानीं यदि गच्छति तर्हि ते सर्वे भवनेषु एव मिलन्ति, सायङ्काले च समितौ इति गुलाम अलिः सर्वम् अवोचत् ।

भवतः भूरि भूरि धन्यवादाः इति वदन् पण्डितजी स्ववस्तूनि गृहीतवान् ।

द्वौ पृथक् पृथक् प्रकोष्ठं स्वीकृतवन्तौ, परं द्वौ अपि प्रकोष्ठौ समीपे एव आस्ताम् । द्वयोः मध्ये द्वारं न आसीत् ।

कूपं गत्वा द्वौ अपि स्नानादिकार्याणि समापितवन्तौ अनन्तरं पार्श्वस्थं प्रातराशं खादितवन्तौ ।

खुदीराम उक्तवान् - प्रफुल्ल ! इदानीं वयम् अस्माकम् आयोजनविषये चर्चां कुर्मः । अहं तेषां समितिस्थानं प्रति गच्छामि, भवता तेषां वासस्थानं प्रति गन्तव्यम् अस्ति । भवान् यथायोग्यां वेशभूषां धृत्वा किंग्सफोर्डस्य प्रासादं गृहम् अन्वेषयतु ?

अहं मम कार्यस्य सज्जतां कृत्वा निर्गमिष्यामि, दुर्गाप्रसादमहाशयः ! एवं हसन् प्रफुल्लः उक्तवान् ।

शुभकामनाः इति वदन् प्रफुल्लः हस्तौ दोलयन् निर्गतः । किञ्चिद् कालानन्तरं खुदीरामः अपि निर्गतः । खुदीरामः सामान्यानि बङ्गालीजनाय शोभायमानानि एव वस्त्राणि धृतवान् ।

गुलाम - अलिः यं मार्गं दर्शितवान् तत्र तेन चलितुम् आरब्धम् । एतेन एव मार्गेण प्रफुल्लः चाकी किञ्चिद् कालात् पूर्वमेव गतः । कञ्चित् मार्गम् अतिक्रम्य अन्यः एकः मार्गः तस्य दृष्टिपथम् आयातः । सुदूरं पृथक् पृथक् भवनानि तेन दृष्टानि । खुदीरामः ज्ञातवान् यत् एषा आङ्ग्लवसतिः अस्ति । शङ्का न उत्पद्येत इति हेतोः खुदीरामः चलितुम आरभत

। परं तस्य दृष्टिः तु तेषां भवनानां मध्ये स्थितस्य अनन्तरस्य अभ्यासं करोति स्म ।

भवनानां पश्चिमभागे वनस्य प्रारम्भः भवति स्म, तस्यां दिशि वनस्य अग्रभागे कश्चित् उच्चमार्गः जलमार्गः अस्ति न वा इत्यस्य निरीक्षणं करणीयम् आसीत् । सः तस्य पुरतः क्रोशार्धपरिमिते अन्तरे समितेः द्वारं दृष्टवान् । आङ्ग्लानां गृहेभ्यः समितिस्थानं प्राप्तुम् एकः एव मार्गः आसीत् यत्र सः प्रचलन् आसीत् ।

खुदीरामः क्षणं विरम्य विचारितवान् यत् इदानीं समितिस्थानं प्रति गमनेन कोऽपि लाभः नास्ति, गमनं वृथा एव अस्ति । यतोहि आङ्ग्लजनाः सर्वदा सायङ्काले एव समितिं प्रति आगच्छन्ति । सः अनुक्षणं प्रतिनिवर्तितः ।

आपणं गत्वा पुस्तकापणात् पुस्तकं मार्गाणां भूपटं च क्रीतवान् । तदनन्तरम् उपाहारगृहं गत्वा तेन अल्पाहारः कृतः । पश्चात् धर्मशालाम् आगत्य मार्गमापनस्य अभ्यासम् आरब्धवान् ।

सायङ्कालस्य पञ्चवादनम् अभवत् । सः धर्मशालातः समितिमार्गं प्रति प्रस्थितवान् । समितिद्वारं च प्राप्तवान् । द्वारे स्थितः वैदेशिकः द्वारपालः खुदीरामम् अवरुद्ध्य उक्तवान् "चलतु भवान् शीघ्रम् इतः अपसरतु । पश्यतु किंग्सफोर्डमहाशयस्य फेटनः आगच्छति ।"

खुदीरामः झटिति दूरम् अपसृतः । परन्तु सः ग्रीवां परिभ्राम्य किंग्सफोर्डस्य रथविशेषं सम्यक् अवलोकितवान् । अनन्तरम् एकस्य वृक्षस्य पृष्ठतः स्थित्वा सः द्वारं प्रति अवधानपूर्वकं पश्यन् आसीत् ।

रथविशेषः, तस्य वर्णः रचना - अश्वः - अश्वचालकं च खुदीरामः समीचीनतया दृष्टवान् । कींग्सफोर्डं सः यानात् अवतरन्तम् अपि दृष्टवान् । मुखं तस्य शिरस्त्रेण आच्छादितम् आसीत् । परं तस्य औन्नत्यं खुदीरामेण सम्यक् निरीक्षितम् ।

अधुना खुदीरामः सहसा परावर्तितः चलितुं च प्रारभत । क्रमशः सर्वान् रथविशेषान् पश्यन् सः किंग्सफोर्डस्य रथविशेषं दृष्टवान् । सः रथविशेषः दूरतः अपि ज्ञातुं शक्यः आसीत् यतो हि सः विशिष्टः दृश्यते स्म ।

सूर्यः अपि अस्तं गतः आसीत् । मार्गं प्राप्य सः धर्मशालां प्रति प्रस्थितः ।

धर्मशालाम् आगत्य तेन क्रीतं पुस्तकं पठित्वा सः प्रगाढनिद्रायां प्रसुप्तः ।

२९ एप्रिल १९०८ तम दिनस्य प्रातःकालः ।

प्रातर्विधीन् यथाशीघ्रं समाप्य खुदीरामः प्रफुल्लः च मिलित्वा बहिः निर्गतौ ।

किंग्सफोर्डस्य वधः तस्य गृहे कर्तुं न शक्यते यतः द्वौ प्रतीहारौ अहर्निशं तस्य गृहस्य रक्षणं कुर्वन्ति । अतः किंग्सफोर्डस्य वधात् पूर्वम् एतौ द्वौ मारणीयौ भवेताम् । तत् किंग्सफोर्डस्य वधात् पूर्वम् एतौ द्वौ मारणीयौ भवेताम् । तत् च गोलिकाप्रहारेण विना न शक्यः । गोलिकाप्रहारेण ध्वनिः भविष्यति तेन कोलाहलः च भविष्यति । जनाः अपि सम्मिलेयुः ।

आरम्भे ताभ्यां तथा विचारितं यत् अयं न्यायालये एव मारणीयः, तदेव उचितम् अस्ति । यदा न्यायाधीशः आसन्दे उपविष्टः स्यात् तदा एतौ कस्यचित् वादस्य प्रक्रियां द्रष्टुं गमिष्यतः तेन व्याजेन तस्य उपरि विस्फोटकं क्षिप्त्वा पलायिष्यतः एवं द्वाभ्यां विचारितम् । परन्तु यदा न्यायालयस्य सुरक्षां तौ दृष्टवन्तौ तदा ताभ्यां विचारः परिवर्तनीयः अभवत् । न्यायालये विस्फोटकेन सह प्रवेशावसरे प्रतिग्रहणस्य भयम् आसीत् । वस्तुतः सर्वकारस्य आशङ्का आसीत् यत् न्यायालयस्य उपरि कदापि कस्मिन्नपि काले आक्रमणं किंग्सफोर्डस्य उपरि विस्फोटकेन भविष्यति । क्षेपणेन बहूनां निर्दोषाणाम् अपि मरणभयम् आसीत् अतः तादृशं कार्यम् आवाभ्यं कथं करिष्यते ? इति विचारतवन्तौ ।

अतः किंग्सफोर्डः स्वगृहात् यदा समितिं गच्छति अथवा समितितः गृहं गच्छति तस्मिन्नवसरे तस्य वधः कर्तव्यः इति निर्णितम् ।

वधकरणार्थ ३० एप्रिल इति दिनं निर्धारितम् । वधाय स्थलस्य समयस्य वृक्षस्य च स्थानानां निर्णयः अभवत् । वधानन्तरं कस्यां दिशि पलायनं करणीयम् इत्यादीनां चर्चा जाता । उपाहारगृहं गत्वा अल्पाहारः कृतः । उपाहारगृहात् बहिः आगत्य द्वौ आपणं प्रति प्रस्थितौ, किञ्चित् क्रयणं कृत्वा पुनः धर्मशालां प्रत्यागतवन्तौ ।

•••

प्रकरणम् - ९

फेटनस्य (रथविशेषस्य) उपरि आक्रमणम् ।

खुदीरामः प्रफुल्लः च मध्याह्नं यावत् विश्रामं कृतवन्तौ । आवश्यकतानुसारम् एव अल्पाहारः स्वीकृतः । द्वयोः समीपे विस्फोटकद्वयम् आसीत् । द्वयोः समीपे द्वे द्वे भुशुण्डयौ अपि आस्ताम् । तदतिरिक्तं तीक्ष्णाः छुरिकाः अपि आसन् । द्वाभ्यां संश्लिष्टानि वस्त्राणि धृतानि । धावनार्थम् उपयुक्ताः उपानहः धृताः । अनावश्यकानि वस्तूनि प्रकोष्ठे स्थापितानि । यैः वस्तुभिः परिचायितुं शक्याः भवन्ति तानि वस्तून्यपि नाशितानि । द्वौ क्रान्तिवीरौ रणभूमिं प्रविष्टौ ।

निश्चिते काले निश्चित स्थो द्वौ प्राप्तवन्तौ निश्चिते निबिडे वृक्षे प्रफुल्लः चित्रकवत् आरोहणं कृतवान् खुदीरामः चतुर्दिक्षु व्यवलोकयत् । अनन्तरं सोऽपि वृक्षम् आरूढः । द्वौ वृक्षे उपविष्टवन्तौ । शुक्लपक्षस्य द्वितीयातिथिः आसीत् । आकाशे चन्द्रमाः निर्गत्य झटिति अस्तङ्गच्छति इति प्रतीयते स्म । सर्वासु दिक्षु प्रगाढः अन्धकारः आसीत् ।

कालान्तरे एकः अश्वशकटः तदनन्तरं च द्वितीयः अश्वशकटः निर्गतः । तृतीयः रथविशेषः दूरात् यदा दृष्टः तदा अनुक्षणं खुदीरामः अवदत् "यः रथविशेषः आगच्छन् अस्ति सः किंग्सफोर्डस्य अस्ति ।" सः रथविशेषः वृक्षसकाशात् समितिस्थलं प्रति धावितः ।

तस्मिन् सः उपविष्टः अस्ति, अहं तम अवश्यम् - इति खुदीरामः उक्तवान् ।

एकं द्वारापालं वेगेन समितिं प्रति गच्छन्तं द्वौ अपि दृष्टवन्तौ । द्वारपालः प्रायः धावन् एव आसीत् । प्रफुल्लः खुदीरामः च द्वारपालं दूरतः समितिद्वारे प्रविशन्तं दृष्टवन्तौ । सः द्वारपालः आवासस्थानविस्तारात् एव धावन् आगतः आसीत् । वस्तुतः द्वारपालः एकं लिखितसन्देशं स्वीकृत्य एव गच्छन् आसीन् । सः सन्देशः श्रीमत्केनेडीदम्पतीभ्यामेव आसीत् ।

सन्देशं श्रीमान् केनेडीः पठितवान्, पठित्वा च स्वपत्न्यै दत्तवान् । तत् पत्रं पठित्वा केनेडीवर्यस्य नेत्रे हर्षेण विस्फारिते जाते ।

अहा !!! अन्ततो गत्वा कतिवर्षाणाम् अनन्तरं मम भगिनी हेलन आगता - इति

श्रीमान् केनेडीः अवदत् - भवति गच्छतु, अतिथेः स्वागतं करोतु । अहं विलम्बेन प्राप्स्यामि । अस्मत्पुत्रीम् अपि भवत्या सह नयतु ।

श्रीमती केनेडीः श्रीमन्तं केनेडीम् उक्तवती - किंग्सफोर्डमहाशयः ! कृपया, भवतः रथविशेषं ददाति वा ? भवतः चालकं कृपया आदिशतु यत् अस्मान् गृहं प्रापयेत् ।

श्रीमान् किंग्सफोर्डः स्वरथचालकम् आहूय सूचितवान् - श्रीमती केनेडीं तस्याः पुत्रीं च गृहं प्रापय्य शीघ्रम् एव प्रत्यागच्छतु ।

मातापुत्र्योः रथविशेषे आरोहणानन्तरं चालकः कशया अविध्यत्, अश्वं च मार्गे धावन्तम् अकरोत् ।

प्रफुल्लः वेगेन वृक्षात् अवतीर्णः । तस्य पृष्ठतः खुदीरामः अपि अवतीर्णः ।

द्वौ अपि वृक्षस्य पार्श्वतः प्रच्छन्नौ । प्रफुल्लः नग्नं विस्फोटकं हस्ते स्वीकृतवान् ।

खुदीरामः दक्षिणेन हस्तेन विस्फोटकं गृहित्वा वामेन हस्तेन भुशुण्डिं सज्जां कृतवान् । दुन्दुभिनादः इव घोटकस्य पादाः मार्गे गुञ्जन्ति स्म । रथविशेषः अश्वः च वृक्षसकाशम् आगताः । प्रफुल्लः बङ्गालीव्याघ्रः इव कूर्दितः तस्य हस्तेन च विस्फोटगोलः क्षिप्तः ।

नेत्रनिमेषकाले एव खुदीरामः चित्रकवत् उत्प्लुतः । तेन सहैव तस्य हस्ते स्थितः विस्फोटकः अपि उत्प्लुतः ।

कर्णपटयोः विस्फारणं भवेत् तावात् ध्वनिः अभवत् ।

खुदीरामः प्रफुल्लः च चीत्कारं श्रुतवन्तौ, अश्वः पतितः दृष्टः । यानं पूर्णतया विध्वंसम् । वातावरणं सर्वतः धूमायितम् । अग्ने ज्वालाः उत्प्लुताः । सन्तोषम् अनुभूय द्वौ अपि पलायितौ । प्रफुल्लः स्वनिश्चितां दिशं प्रति अधावत् । खुदीरामेण स्वमार्गः स्वीकृतः ।

विस्फोटस्य प्रचण्डध्वनिः द्विवारं समितौ उपविष्टैः आङ्ग्लैः श्रुतः । स्व-स्वभुशुण्डीः

हस्ते गृहीत्वा सर्वेऽपि धावन्तः बहिः आगताः । समितेः द्वारपालाः अपि स्वभुशुण्डीः उन्नीय मार्गं प्रति अधावन् ।

चीत्कारैः पूर्णमार्गः सङ्क्रान्तः ।

यदा ते तस्य वृक्षस्य अधः आगताः तदा एकेन द्वारपालेन उल्कदीपिका प्रज्वालिता ।

मार्गे रुधिरेण गर्ताः पूरिताः अभवन् । अश्वस्य शरीरम् अपि खण्डेषु विभक्तम् अभवत् । कुमार्याः केनेड्याः शरीरम् एव नासीत् । केवलम् अस्थिमांसादीनां राशिः एव सर्वत्र दृश्यते स्म । श्रीमत्याः केनेडीवर्यायाः कण्ठभागात् रुधिरप्रवाहः वेगेन भवति स्म । सा अन्तिमान् श्वासान् स्वीकरोति स्म । वृक्षात् मार्गात् च अनतिदूरे चालकः पतितः आसीत् । कस्यचित् कालस्य अनन्तरं आरक्षकद्वयेन सम्पूर्णः विस्तारः स्वाधिनीकृतः । एकस्य नाम फैजद्दीनः अपरस्य च नाम तहसीमदारः आसीत् ।

आङ्ग्लानाम् आदेशाः अभवन्

मुजफरपुरं पिदधतु ।

वनं व्यावृण्वन्तु ।

नदीमार्गेषु निरीक्षकान् नियोजयन्तु ।

पोतायतनानाम् अवलोकनं कुर्वन्तु ।

तान् जीवितान् मृतान् वा आनयन्तु ।

गुप्तचराणां वृन्दैः कार्यम् आरब्धम् । रेलस्थानकेषु पोतायतनेषु जलमार्गेषु च आरक्षकाः प्रसृताः ।

श्रीमतीं केनेडीं कश्चित् चिकित्सालयं नयेत् तत् पूर्वमेव सा दिवङ्गता ।

गुप्तचराणाम् आरक्षकाणां वा समीपे क्रान्तिकारिणां किमपि वर्णनं न आसीत् । कदाचित् किंग्सफोर्डस्य चालकः किञ्चिद् वदेत् परं सः इतोऽपि मूर्च्छितः आसीत् ।

तस्मिन् विषये न का अपि शङ्का आसीत् यत् द्वयोः वधः दोषवशात् अभवत् एवञ्च श्रीमान् किंग्सफोर्डः नितान्तं रक्षितः ।

मुख्यश्वेत-उच्चाधीक्षकेन उक्तं यत् - "श्रीमतः किंग्स फोर्डवर्यस्य वधार्थम् एतत् षडयन्त्रम् आयोजितम् आसीत् । क्रान्तिकारिणः श्रीमन्तं किंग्सफोर्डं मारयितुं कियन्तः प्रतीक्षमाणाः आसन् इति एतस्मात् ज्ञातुं शक्यते । यदि श्रीमतीः केनेडीः एतत् यानं न अनेष्यत् तर्हि द्वयोः अपि प्राणहानिः न अभविष्यत् ।"

इदानीं किंग्सफोर्डः ज्ञातवान् यत् बङ्गस्थ क्रान्तिकारिणः रक्त पिपासिताः जाताः सन्ति । इतः परम् अयम् अग्निः अयं विस्फोटश्च दावानलस्वरूपेण परिवर्तितः भविष्यति ।

साम्राज्यवादस्य केवटमञ्जुषे खुदीरामेण प्रफुल्लेन च भयङ्करं कीलकं स्थापितम् आसीत् आङ्ग्लाः अतीव व्यवहारकुशलाः, वीराः अपि । वीराः जनाः अन्यवीरान् अनुक्षणम् अवलक्षयन्ति ।

देशस्य राजनीतौ खुदीरामेण प्रफुल्लेन च नववर्णः एव पूरितः । रुधिरस्य वर्णानां पूरयितारः क्रान्तिवीराः विंशतितमस्य शताब्दस्य शुभारम्भे एव शुभशकुनं कृतवन्तः ।

खुदीरामः प्रफुल्लः च अन्धकारपूर्णां निशां विदारयन्तौ कूर्दन्तौ ओष्ठौ चर्चयन्तौ धावन्तौ आस्ताम् द्वयोः हृदयम् अपारेण हर्षेण पूरितम् आसीत् ।

सुदूरे क्षितिजे पूर्वतः उषसः आगमनं दृश्यते स्म ।

●●●

प्रकरणम् - १०

किंग्सफोर्डः सुरक्षितः ।

शरीरस्य सर्वाणि अङ्गानि एकस्यां दिशि एव कार्यरतानि आसन् धावतु.... धावतु.... धावतु.... ।

खुदीरामेण पादाभ्याम् उपानहौ निष्कासितौ । तस्य पादयोः बहूनि शूलानि प्रविष्टानि । कण्टकानां गुल्मेषु अन्धकारे धावनेन सर्वेभ्यः अङ्गेभ्यः रुधिरं स्रवति स्म । तस्य वस्त्राणि अपि विदिर्णानि । कञ्चन कालं यावत् उपानहौ रक्षयित्वा तौ क्षिप्तौ । कण्ठः शुष्कः पिपासया । तथापि सः धावन् आसीत् । तस्य पादौ एव न विरमतः । दिशां ज्ञानम् अपि न आसीत् । वनस्य समाप्तिः न भवति स्म न च सूर्योदयः भवति स्म । एकेन बृहत् - पाषाणेन सः घट्टीतः । यदा सः उत्थितः तदा एकः क्षतयोद्धा इव स्खलन् भूमौ निपतितः । तस्य शिरसः रुधिरधारा प्रवाहिता । तथापि तेन धावनं न स्थगितम् ।

प्रातः कालः अभवत् । पक्षिणां कलकलध्वनिः तेन श्रुतः । सहसा तस्य पादयोः रेलयानस्य लोहपथः आगतः । किञ्चिद् दूरम् एव तेन रेलसङ्केतदीपः दृष्टः सः धावितः स्थानकस्य फलकं तस्य पुरतः आसन्नम् । तेन विस्फारितनयनाभ्यां बङ्गालीशब्दाः पठिताः - बैनी ।

स्थानकं प्रति गमनापेक्षया अधः भागे एकस्मिन् मृण्मयमार्गे अवतीर्णः । किञ्चिद् दूरं गतः । उपाहारगृहं दृष्टम् तत्र बहिः स्थापितायाम् उत्पीठिकायां सः उपविष्टः ।

अन्तः उपविष्टाः चत्वारः बङ्गीयाः वर्तमानपत्रं पठन्ति सम, समाचारस्य चर्चाम् अपि कुर्वन्ति स्म ।

मुजफरपुरे द्वौ विस्फोटौ जातौ ।

क्रान्तिकारिभिः विस्फोटकद्वयं क्षिप्त्वा किंग्सफोर्डस्य रथविशेषः पूर्णः नाशितः ।

पुनरेकवारं किंग्सफोर्डः सम्पूर्णः सुरक्षितः ।

यतोहि रथविशेषे किंग्सफोर्डस्य स्थाने श्रीमतीः केनेडी कुमारी केनेडी च आस्ताम् । मातापुत्र्यौ द्वे अपि मृते ।

क्रान्तिकारिणां पुनरेकः प्रयत्नः निष्फलः.....।

समाचारं श्रुत्वा खुदीरामः तु यथा पक्षाघातपीडितः अभवत् । तस्य सर्वाङ्गं कम्पते स्म । स्वेन क्षिप्तात् विस्फोटकात् किंग्सफोर्डस्य स्थाने निर्दोषे मातापुत्र्यौ मृते ।

तदा एव द्वौ सामान्यवेशधारिणौ गुप्तचरौ आगत्य तस्य समीपे स्थितवन्तौ । खुदीरामस्य रुधिरक्लिन्नं मुखं विदीर्णानि वस्त्राणि विप्रकीर्णान् केशान् रक्तवर्णनेत्रे च दृष्ट्वा द्वौ अपि चकितौ, खुदीरामम् उभयतः उपविष्टौ ।

भवान् कुतः आगतः ?

भवतः एषा स्थितिः कथम् अभूत् ?

भवतः नाम किम् ?

खुदीरामः तूष्णिं स्थितवान् ।

एकः गुप्तचरः अग्रे आगत्य खुदीरामस्य हस्तं गृहीतवान् । विद्युद्वेगेन खुदीरामः स्वहस्तं तस्य हस्तात् मोचितवान् । गुप्तचरः अपि व्याघ्रवत् कूर्दितः तेने द्वौ हस्तौ प्रसार्य खुदीरामः हस्तयोः समाविष्टः अन्येन गुप्तचरेण खुदीरामस्य केशाः गृहीताः ।

कार्षाकर्षणे खुदीरामः पतितः, हस्तात् भुशुण्डिः पतिता । गुप्तचरः तं मर्दितवान् एव ।

विद्युतः वेगेन वार्ता प्रसृता यत् कश्चित् क्रान्तिवीरः निगडितः अस्ति इति, अनुक्षणम् आरक्षकाणां यानम् अपि आगतम् । खुदीरामस्य निरीक्षणावसरे भुशुण्डिद्वयम् प्राप्तम् । खुदीरामस्य समीपे त्रिंशत् रूप्यकाणि रेल-समयपत्रकं भारतीय-रेलवे गविभागस्य

मानचित्रम् अपि आसीत् । खुदीरामस्य हस्तपादाः लोहपाशैः बद्धाः । तेन पातुं जलं याचितम् । एकः आरक्षकः । तस्मै जलं पायितवान् । द्वित्रान् कलशान् यावत् जलं पीत्वा तेन गर्जना कृता -

वन्दे मातरम्

आरक्षक - उच्चाधिकारी स्वयं खुदीरामेण सह प्रश्नोत्तरं कृतवान्, परं खुदीरामपक्षतः एकमेव उत्तरम् आसीत् -

वन्दे मातरम्

गौरवर्णीयः आङ्ग्लाधिकारी प्रबलवेगेन एकां चपेटिकां खुदीरामस्य मुखे दत्तवान् । खुदीरामस्य मुखात् रुधिरं बहिरागतम् । सः निष्ठीवनं कृतवान् । पुनः च - वन्दे मातरम्

आङ्ग्लः पुनः हस्तम् उन्नीतवान् ।

"अस्माकं क्रान्तिवीराः भवन्तं जीवितं न मोक्ष्यन्ति ।"

खुदीरामस्य हस्तपादेषु लोहपाशाः लग्नाः आसन् । सः यानेन आरक्षकैः आरक्षकालयं प्रति नीतः ।

तत्र आगत्य खुदीरामः स्वस्य विवरणं लेखितवान् - "मम नाम खुदीरामः बोझ्रः अस्ति । श्रीमता किंग्सफोर्डवर्येण सह मम व्यक्तिगतं वैरम् आसीत् । अहं कस्यापि मार्गदर्शनेन एतत् कार्यं न कृतवान् । किंग्सफोर्डस्य याने अहमेव विस्फोटकं क्षिप्तवान् परन्तु सः रक्षितः । तस्य स्थाने द्वौ निर्दोषौ मृतौ तदर्थं मम पश्चातापः अस्ति । मया सह कोऽपि सहयोगी न आसीत् । अहम् अङ्गीकरोमि यत् अहं किंग्सफोर्डं मारयितुम् इच्छामि स्म किन्तु किंग्सफोर्डस्य स्थाने श्रीमतीः केनेडीः तस्याः पुत्री च मृते, तदर्थम् अहम् अत्यन्तं खेदम् अनुभवामि । एतत् कार्यं सम्पादयितुं मह्यं केनापि धनं दत्तं नास्ति, न च केनापि कार्यम् इदं निर्दिष्टम् अस्ति । मम समीपे विद्यमानायाः भुशुण्डयाः

अनुमतिपत्रम् अपि नास्ति । वर्तमानपत्राणां पठनेन नैकानां नेतॄणां भाषणश्रवणेन देशप्रेमभावना प्राप्ता अस्ति । एतत् मदीयं विवरणं विद्यते ।”

भवता सह अन्यः जनः आसीदेव ? इति अधिकारी उक्तवान् ।

“मया मम विवरणं सम्पूर्णं प्रदत्तम् एव” - खुदीरामः अकथयत् ।

आरक्षकः खुदीरामं चित्रविचित्रान् प्रश्नान् अकरोत् । खुदीरामः श्रान्तः । इदानीं सः श्रान्ततायाः रात्रिजागरणस्य बुभुक्षायाः चा करणैः चूर्णचूर्णीकृतकायः जातः ।

इदानीं सः आरक्षकस्य सर्वेषां प्रश्नानाम् उत्तररूपेण केवलं “वन्दे मातरम्” इति वदति स्म । अन्ततो गत्वा आरक्षकाः अपि श्रान्ताः ।

●●●

प्रकरणम् - ११

प्रफुल्लचन्द्रचाकेः आत्मसमर्पणम् ।

प्रफुल्लः चाकी अपि आरात्रिः धावितवान् । प्रफुल्लः स्वस्थतया एव धावितवान् आसीत् । यद्यपि शूलानां गुल्मैः तस्य शरीरम् अपि व्रणितम् आसीत् परं पादयोः उपानहयोः कारणात् कण्टकाः न प्रविष्टाः । रात्रेः अधिकारं विदार्य यदा उषः कालः आगतः तदानीमपि सः धावन् एव आसीत् ।

प्रातः कालं दृष्ट्वा तस्य शरीरे नवचैतनं प्रविष्टम् । तदैव तेनापि रेलयानस्य लोहपथः अवलोकितः । दूरादेव तेन समस्तिपुरम् इति स्थानकं दृष्टम् ।

प्रफुल्लः स्वात्मानं निगूहयन् ग्रामं प्रविष्टः । सर्वप्रथमं तेन नूतनानि वस्त्राणि क्रीतानि । उपानहौ अपि क्रीतौ । चायं पीत्वा प्रातराशोऽपि स्वीकृतः । अनन्तरं वनं प्रविष्टवान् । उपानहौ वस्त्राणि च धृत्वा विदीर्णवस्त्राणि पुरातन - उपानहौ च गर्ते क्षिप्तवान् ।

प्रफुल्लः रेलस्थानकम् आगत्य मोकामघाट इति स्थानकस्य प्रयाणचिटिकां क्रीत्वा यानं प्रतीक्षते स्म ।

आगते याने आरुह्य प्रफुल्लः उपविष्टः ।

नन्दलालः बेनर्जि नामकः कश्चिन् निरीक्षकारक्षकः रेलयानस्य तस्मिन् एव प्रकोष्ठे उपविष्टः आसीत् । प्रातः कालीनं वर्तमानपत्रं तेन पठितम् आसीत् । प्रफुल्लं दृष्ट्वा सः कश्चन शङ्कितः यत् कदाचित् एषः मुजफरपुरस्य विस्फोटघटनायां संलग्नः स्यात् वा ????

सः प्रफुल्लेन सह सम्भाषणं प्रारभत । एकस्मिन् स्थानके तेन चायद्वयम् आनयितम् । चायपानार्थं प्रफुल्लः निमन्त्रितः । अनन्तरं बेनर्जिः पृच्छति -

भवान् कुत्र गच्छति ?

मोकामघाटं प्रफुल्लः प्रत्युत्तरितवान् ।

मम नाम नन्दलालः बेनर्जिः । अहं सर्वकारीयसेवायाम् आसम् परन्तु अहं गुरुदेवेन अहिंसक - आन्दोलने युक्तः मया सेवात्यागः करणीयः अभवत् । सेवा भवतु गता । परन्तु देशार्थं किमपि कृतम् इत्यस्य गर्वम् अनुभवामि ।

भवान् वस्तुतः स्वदेशे स्निह्यति इति वदन् प्रफुल्लः सरसं सम्भाषणम् आरब्धवान् ।

देशस्य स्वातन्त्र्याय प्रत्येकेन युवकेन योद्धव्यम् । अस्माभिः पराधीनतायाः मुक्तिः प्राप्तव्या एव इति नन्दलालः उक्तवान् ।

भवतः नाम किम् ? इति नन्दलालः पृष्ठवान्

प्रभातकुमारः बेनर्जिः यत् नाम शीघ्रं स्मृतं तदेव तेन अनुक्षणं भणितम् ।

मोकामघाटस्य स्थानकम् आगतम् । द्वौ अपि यानात् अवतीर्णौ । इतः कालिकातां प्रति गन्तुं महापोते उपवेष्टव्यं भवति । एतस्मिन् एव स्थानके एनं शङ्कास्पदं युवकं ग्रहीतुं नन्दलालस्य योजना आसीत्, परं सः वयसा प्रौढः आसीत् । पुनश्च तेन विचारितम् अपि यत् अस्य समीपे शस्त्रम् अपि भवेत् । शीघ्रतायां सः न किमपि अनुचित्तम् आचरितुं सज्जः आसीत् ।

मोकामघाट - स्थानकस्य एकस्याम् उत्पीठिकायां द्वावपि उपविष्टौ । भवान् उपविशतु, अत्रत्यः एकः आपणिकः मम मित्रम् अस्ति, तेन मिलित्वा अहम् आगच्छामि इति नन्दलालः उक्तवान् ।

नन्दलालबाबुः आरक्षकालयं प्राप्तवान् । स्वपरिचयं च दत्तवान् । अनन्तरम् अधिकारिणम् अवदत् - मम दृढः संशयः अस्ति यत् मया सह आगतः युवकः मुजफरपुरस्य विस्फोटघटनायां संलग्नः विद्यते ।

अधिकारी सैनिकान् स्वीकृत्य प्रस्थातुं सज्जः ।

व्यूहरचना कृता नन्दलालः अग्रे प्राचलत् आरक्षकैः नन्दलालात् योग्यम् अनन्तरं स्थापितम् ।

यत्र स्ववस्तूनि स्थापितानि आसन् तत्र नन्दलालः गर्जितवान् अधिगृह्णन्तु एनं

जनम् इति ।

शब्दान् श्रुत्वा सद्यः एवः प्रफुल्लः अकूर्दत् । सः स्फपुरतः नन्दलालम् आरक्षकद्वयं च आगच्छतः दृष्टवान् ।

हे देशद्रोहिन् ! दुष्ट ! विश्वासघातिन्

प्रफुल्लः अगर्जत् । परन्तु अनुक्षणमेव परिस्थितिम् अगवम्य सः अधावत् । आरक्षकाः तम् अनुधावितवन्तः ।

प्रफुल्लः कोशात् भुशुण्डिं निष्कासितवान् ।

पश्चात् परिवृत्य आगच्छन्तं नन्दलालं लक्षीकृत्य सः गोलिकाप्रहारं कृतवान् । परन्तु नन्दलालः प्रौढः अधिकारी आसीत् । प्रफुल्लस्य लक्षसाधनाभिनयं दूरतः दृष्ट्वा सः भूमौ सुप्तः एव अतः प्रफुल्लस्य गोलिका वृथैव नष्टा ।

प्रफुल्लं परितः सैनिकाः आसन् ।

वन्दे मातरम्

तेन पुनरेकवारं भुशुण्डिः उन्नीता ।

इदानीम् आरक्षकाः अत्यन्तं निकटे आसन् । प्रफुल्लेन स्ववक्षःस्थलं लक्षयित्वा गोलिकाप्रहारः कृतः ।

वन्दे मातरम् इति वदन् प्रफुल्लः अमुकं कालं स्थितवान् । पुनः भुशुण्ड्याः नालिकां कण्ठस्योपरि स्थापयित्वा पुनः प्राहरत् । धडाम् इति द्वितीयः शब्दः जातः । वन्दे मातरम्, वन्दे मातरम् ।

अन्तिमश्वासपर्यन्तं प्रफुल्लः चकितः वन्दे मातरम् वदन् आसीत् । १९०८ दिनस्य मईमासस्य प्रथमदिनाङ्कः आसीत् । प्रफुल्लः चाकी स्वनामाङ्कनम् अमरहुतात्मसु लेखयित्वा पुनरागमनप्रपञ्चात् मुक्तः अभवत् । वीरगतिं प्राप्नोत् ।

●●●

प्रकरणम् - १२

उद्बन्धनस्य स्थाने ।

वीरस्य प्रफुल्लस्य मृतदेहः कालिकातानगरम् आनीतः । निष्ठुरेण सर्वकारेण तस्य मृतदेहस्य अपि मस्तकं कर्तितम् । न्यायालये च उपस्थापितम् । पश्चात् प्रफुल्लस्य मृतदेहस्य अग्निसंस्कारः अपि न कृतः । आरक्षकालयस्य पृष्ठतः तैः तस्य वीरस्य मृतदेहः निखनितः । समयः सायङ्कालीनः आसीत् ।

प्रफुल्लचाकेः बलिदानस्य समाचारः वायुवेगेन बङ्गाले प्रसृतः । समाचारपत्रेषु विस्तृतानि विवरणानि जनैः पठितानि । चतुर्थे दिवसे कालिकातायाः सरपेन्टाइन इति बीथितः गच्छति स्म ।

अकस्मात् तस्य पुरतः कुतश्चित् एकः सप्तदशवर्षीयः किशोरः उपस्थितः । 'भवान् प्रफुल्लचाकिनं विश्वासघातेन गृहीतवान्, सत्यं खलु ? सर्वकारेण भवते कः पुरस्कारः प्रदत्तः ?' इति बालकः पृष्टवान्

नन्दलालः एकं पदं प्रतिसरणं कृतवान् ।

'भवतु नन्दलालमहाशय ! बङ्गस्य क्रान्तिकारिणः भवते पुरस्कारं यच्छन्ति' इति वदन् सः किशोरः अग्रे आगत्य भुशुण्डिम् उन्नीय द्विवारं चलितवान् ।

धडिम् ..... धडिम् .....

नन्दलालाबाबुः मृतः ।

खुदीरामस्य प्रफुल्लचाकेः च शृङ्खलाबद्धानि विवरणानि समाचारपत्रेषु प्रकटितानि । बङ्गप्रदेशः एतेषां पराक्रमैः एव आश्चर्यान्वितः । सम्पूर्णराष्ट्रस्य समाचारपत्रैः प्रफुल्लस्य बलिदानं प्रशंसितम् । शोकसभाः आयोजिताः, प्रफुल्लाय भव्यातिभव्यः श्रद्धाञ्जलिः प्रदत्तः ।

१९०८ तमे दिवसे मुजफरपुरस्य न्यायालये जनपदन्यायाधीशस्य वूडमेन इत्यस्य पुरतः खुदीरामस्य अभियोगः प्रस्तुतः ।

अस्मिन् समये तत्र बङ्गाली अधिवक्तारः उपस्थिताः आसन् । तेषु एकः उपेन्द्रनाथः सेनः अपि आसीत् । सः तदानीन्तनस्य प्रसिद्धवर्तमानपत्रस्य बङ्गाली इत्यस्य संवाददाता आसीत् । सेनमहाशयः खुदीरामं दृष्ट्वा "समीपस्थम् अमुं बालं पश्यतु, कथं शान्तचित्तेन अस्माकं मुखं पश्यन् हसति सः । मम हृदये अस्मै सज्जनाय स्नेहः उत्पन्नः अस्ति ।

सर्वे पश्यन्तः आसन् । एकः सैनिकः स्थालिकायां मिष्टान्नं जलपात्रं च गृहीत्वा खुदीरामस्य समीपम् आगतवान् । "लालाजे ! मिष्टान्नं खादन्तु, जलं च पिबन्तु ।"

"धन्यवादाः । तत् सर्वं न आवश्यकम् ।" खुदीरामः विनम्रतया सैनिकम् उक्तवान् ।

खुदीरामस्य पक्षतः अधिवक्तृत्वेन रङ्गपुरस्य सतीशचक्रवर्ती उपस्थितः आसीत् । न्यायलये जनानां महान् सम्मर्दः आसीत् । तथा प्रतीयते स्म यत् मुजफरपुरं सम्पूर्णम् एव तत्र आगतम् ।

"भवान् श्रीमान् खुदीरामः बोझः । भवतः उपरि द्वयोः निर्दोषयोः वधस्य आक्षेपः अस्ति । किं भवान् एनम् आक्षेपम् अङ्गीकरोति वा ?" - न्यायलयेन पृष्टम् ।

"अवश्यम् अङ्गीकरोमि । इतः पूर्वमपि मया विवरणं दत्तम् अस्ति । मया तु किंग्सफोर्डः मारणीयः आसीत् द्वे निर्दोष-मातापुत्र्यौ मम विस्फोटकेन मृते इति आकस्मिकम् आसीत् । परन्तु विस्फोटकम् अहमेव क्षिप्तवान् इति अङ्गीकरोमि ।"

किमर्थं भवान् सम्पूर्णं स्पष्टं विवरणं दद्यात् तर्हि न्यायालयात् सामान्यां शिक्षाम् एव प्राप्नुयात् इति शासकीयः अधिवक्ता उक्तवान् ।

शिक्षा ! एषः भवतां न्यायालयः । क्षमा ! दया ! दण्डनम् । भवान् किं वदति ? अहं भवतां कृपादृष्टिं न इच्छामि । अहं मृत्युञ्जयः अभवम् । भवन्तः मह्यम् उद्बन्धदण्डनं करिष्यति इति अहं जानामि । परन्तु स्मरन्तु भवन्तः । मया उप्तानि विचारबीजानि भवन्तः मारयितुं दण्डयितुं वा न शक्ष्यन्ति - इति खुदीरामः अवोचत् ।

पुनः अग्रे खुदीरामः अकथयत् - "मया कृतं यत् किमपि मम देशाय अस्ति । अहं गर्वान्वितः अस्मि यत् मम देशवासिभ्यः मया विचारबीजानि प्रदत्तानि । देहस्य न किमपि मूल्यम् । मूल्यं जीवनस्य अस्ति । अहं मम जीवनं धन्यं मन्ये । देशाय, मातृभूम्याः मुक्तये

प्रत्येकस्य नवयुवकस्य चित्ते त्यागभावना उत्पद्येत इत्येव मम इच्छा । इत्येव मम अन्तिमः सन्देशः अस्ति । मया जीवने कृतानि कार्याणि सुजलायै सुफलायै मातृभूम्यै समर्प्य अहं कृतार्थः अस्मि ।

अहं जानामि यत् मृत्युदण्डनात् अतिरिक्ता न कापि महती शिक्षा विद्यते मह्यं दातुम् । मम मृत्योः भयं नास्ति । अहं केनापि क्रान्तिदलेन सह लग्नः नास्मि । किन्तु क्रान्तिकारिणां कार्यशैली प्रवृत्तयः च मह्यं रोचन्ते । हिन्दुस्ताने ब्रिटिशशासनं समापयितुं प्रत्येकेन भारतीयेन शस्त्राणि गृहीतव्यानि, अनेन विना न कोऽपि उपायः स्वातन्त्र्यप्राप्त्यै । मह्यं क्रान्तिकारिणां विचाराः अरोचन्त । विना शस्त्रं स्वातन्त्र्यं नास्ति । क्रान्तिः प्रथमं रुधिरं याचते । एतदेव मम विवरणम् ।"

"भवन्तः यदिच्छन्ति कर्तुम् अर्हन्ति । नान्यत् वक्तुम् इच्छामि । मह्यं भवतां न्यायालयस्य एतानि नाटकानि न रोचन्ते ।"

शासकीयः अधिवक्ता प्रफुल्लचाकी-बारीन्द्रघोष-क्रान्तिदलादि विषये नैकान् प्रश्नान् खुदीरामं पृष्टवान् । परन्तु खुदीरामः 'वन्दे मातरम्' विहाय न किमपि उत्तरितवान् । खुदीरामस्य अधिवक्ता चक्रवर्ती अन्यतमे दिवसे न्यायाधीशं प्रार्थितवान् यत् अहं खुदीरामेण सह एकान्ते किञ्चिद्य सम्भाषितुम् इच्छामि, अतः अनुमतिं ददातु । वूडमेनः तस्य निवेदनम् अङ्गीकृतवान् । चक्रवर्तिने मेलितुम् अर्धहोरात्मकः कालः दत्तः ।

"खुदीराम ! किं भवान् न जानाति यत् वयं केचन अधिवक्तारः रङ्गपुरात् भवन्तं रक्षितुम् एव अत्र आगताः ?" चक्रवर्तीअवोचत् ।

अहं सामान्यं जानामि । - खुदीरामेण उक्तम्

तर्हि किमर्थं भवता आक्षेपाः अङ्गीक्रियन्ते ? चक्रवर्ती पृष्टवान् ।

सर्वे आक्षेपाः सत्याः खलु, तस्मादेव - खुदीरामः निर्भीकतया अवदत् ।

किं भवान् तथा नेच्छति येन जीवितः सन् मातृभूम्यै नवोत्साहेन कार्यं कर्तुं शक्नुयात् ?

परन्तु अहम् असत्यं भाषितुम् असमर्थः ।

चक्रवर्ती तूष्णीं स्थितवान् । परं न अनुत्साहेन । सः नैकवारं खुदीरामं बोद्धुं प्रयतितवान यत् सहयोगं दद्यात् यथा अहं वयं तथा विवरणं कुर्यात् ।

मेलनस्य समयः अपि समाप्तः । अपराह्ने न्यायधीशः पञ्चषष्टिः पृष्ठपरिमितं दीर्घम् अध्यादेशं श्रावितवान् -

'उद्बन्धनम् ।'

शासकीयः अधीवक्ता उक्तवान् - अभियुक्तः खुद ीरामः बोझः निद्राति, तस्य नासास्वराः अपि श्रूयन्ते ।

चकितः भूत्वा न्यायाधीशः अभियुक्तस्य पञ्जारे दृष्टवान् । खुदीरामः प्रगाढं निद्राति स्म ।

न्यायाधीशः आदिष्टवान् "तम उत्थापयन्तु तेनापि निर्णयः श्रोतव्यः ।"

आरक्षकाः तं जागरितवन्तः ।

जृम्भन् सः न्यायाधीशं दृष्टवान् -

"तावत् दीर्घं किमर्थं पठति ?" उद्यबन्धनम् । तावदेव वदन्तु येन अहं त्वं च मुक्तौ भवेव ।

न्यायधीशः आश्चर्यान्वितः । ५४ वर्षाणां जीवने तेन न कोऽपि ईदृशः निर्भीकः युवकः दृष्टः ।

उद्बन्धनम् - न्यायाधीशेन भणितम् ।

खुदीरामं न्यायधीशः पृष्टवान् "किमपि वक्तुमिच्छति ?"

सः अवदत् "अहं राजपूतवीराङ्गनाः इव देशाय प्राणाहुतिं दातुम् इच्छामि । उद्बन्धनदण्डनस्थ कृते नाहं दुःखितः । खेदः तु तदर्थमेव यत् अहं किंग्सफोर्डं मारयितुं न शक्तवान् । सः तस्य अपराधनिमित्तं शिक्षां न प्राप्तवान् । "

चक्रवर्ती पुनः उच्चन्यायालयम् अपि गतवान् परं तेन उच्चन्यायालयेनापि तदेव

दण्डनं घोषितम् ।

अन्ततो गत्वा ११ अगस्त १९०८ तमे दिवसे तस्मै उद्बन्धनं देयम् इति निर्णीतम् ।

खुदीरामः स्वस्य भगिनीं भागिनेयान् च मेलितुम् अन्तिमाम् इच्छां प्रकटितवान् । खुदीरामस्तु क्रान्तिकारिणं गुरुवर्यं पथप्रदर्शकं सत्येन्द्रनाथम् अपि मेलितुम् ऐच्छत् । परन्तु सर्वकारेण तस्मै एका अपि अनुमतिः न दत्ता । परन्तु कालिकातानगरस्य सैयद अबदुलस्य भगिनी समाचारं प्राप्तवती या च मनसा एव खुदीरामं भ्रातृत्वेन परिगणयति स्म । सा सर्वं श्रुत्वा धावन्ती तेन मेलितुं कारागारं गतवती । महता प्रयत्नेन मेलनार्थम् अनुमतिः प्राप्ता ।

मेलनसमयः समाप्तः । तस्याः गमनकाले खुदीरामः अवदत् "भगिनि ! मम ज्येष्ठभगिन्यै प्रणामान् निवेदयतु ।"

"अवश्यम् भ्रातः ।" अब्दुलवहीदस्य भगिनी भ्रातुः खुदीरामस्य मस्तकं चुम्बितवती । शीघ्रमेव प्रतिगता ।

१० अगस्त दिनाङ्के अधिवक्ता कालीदासः खुदीरामेण मेलितुम् आगतः । बहुकालं वार्तालापः प्राचलत् । परन्तु कालीदासः नानुभूतवान् एव यत् अयं जनः अमुक - घण्टानाम् अनन्तरं न भविष्यति इति तस्य मुखे सामान्यम् अपि भयं न आसीत् । परन्तु खुदीरामेण कालीदासः उक्तः यत् "सत्येन्द्रनाथाय मम सन्देशः अवश्यं दातव्यः यत् क्रान्तिकारिगतिविधयः तीव्रवेगेन करणीयाः, यावत् देशः स्वतन्त्रः न भवेत् । भवतु नाम, शतशः खुदीरामैः बलिदानं दातव्यं भवेत् ।"

तस्यां रात्रौ खुदीरामः उद्बन्धप्रकोष्ठे नीतः ।

कारागारस्य प्रतीहारः मेलनाय आगतः ।

खुदीराम ! एतत् आम्रं भवदर्थम् आनीतवान् अस्मि ।

अहो ! तेन किम् ? देहि, खादिष्यामि ।

पुनः किञ्चिद् कालानन्तरं सः आगतवान् तदा खुदीरामः भगवद् गीतायाः

श्लोकम् उच्चारयन् आसीत् । प्रतीहारः खुदीरामस्य पठने विक्षेपम् अनुत्पादयन् तं पश्यन् आसीत् । स्वस्थः शान्तः प्रसन्नचित्तः खुदीरामः श्लोकं पठति स्म ।

दूरे स्थितं प्रतीहारं दृष्ट्वा - आगच्छतु, महाशय । भवता दत्तः प्रसादः मया भक्षितः । खुदीरामः आम्रं तस्य हस्ते स्थापितवान् ।

भवान् तु न खादितवान् एव ?

खादितम् अस्ति - खुदीरामः हसितवान् ।

प्रतीहारः खुदीरामस्य कौशलं दृष्ट्वा हसितवान् । खुदीरामः आम्रं तु चोषितवान् परन्तु बीजं पुनः तथा त्वचि स्थापितवान् फुत्कारेण तस्मिन् वायुं च पूरयित्वा तथा कृतं यथा फलं न खादितमेव ।

अयं जनः मृत्योः अत्यन्तं निकटे स्थित्वा अपि एवं विनोदं करोति । कियत् औदार्यम् । कियत् गाम्भीर्यम् कियान् च निर्भीकः ।

खुदीरामाय ११ अगस्त १९०८ तमे दिने प्रातः षड्वादने मृत्युदण्डः दातव्यः आसीत् । बङ्गाली इति वर्तमानपत्रस्य संवाददाता उपेन्द्रनाथः उद्बन्धनस्थानं गन्तुम् अनुमतिं प्राप्नोत् । सः प्रातः प ञ्चवादने एव अन्त्येष्टिनिमित्तम् उपयुक्तं सर्वं गृहीत्वा प्राप्तवान् आसीत् । परन्तु किमिदम् आश्चर्यम् ? शतशः जनाः पुष्पमालाः गृहीत्वा प्रियतमस्य क्रान्तिकारिणः प्रस्थानकौतुकार्थं सर्वे उपस्थिताः । रात्रिकालात् द्विवादनात् सर्वेषाम् आगमनम् आरब्धम् । आरक्षकाः दृढतया निरीक्षन्ते स्म ।

यदा सेनः कारागृहस्य द्वितीयद्वारात् अन्तः प्रविष्टः तदा तेन पुरतः आगम्यमानः खुदीरामः दृष्टः । तस्य मुखं पुलकितं दृश्यते स्म । तस्य चलने दृढता - आत्मविश्वासः च दृश्यते स्म । सः उपेन्द्रनाथं दृष्ट्वा हसितवान् । सेनः अपि अहसत् ।

११ अगस्त १९०८ - प्रातः कालीनः समयः ।

खुदीरामं तस्य प्रकोष्टात् बहिः आनीतवन्तः । हसन्मुखः खुदीरामः बहिरागतः । तस्य दक्षिणहस्ते भगवद्गीता आसीत् । सः वदति स्म ।

वन्दे मातरम्

सुजलां सुफलां मलयजशीतलाम्

सस्यश्यामलां मातरम्

वन्दे मातरम्

शुभ्रज्योत्सनां पुलकितयामिनीम्

फुल्लकुसुमित द्रुमदलशोभिनीम्

सुहासिनीं सुमधुरभाषिणीम्

सुखदां वरदां मातरम्

वन्दे मातरम्

कारागारिकः खुदीरामस्य हस्तौ बद्धवान् । खुदीरामः अग्रे आगतः । तस्य मुखकान्तिं दृष्ट्वा आङ्ग्लाः अधिकारिणः लज्जिताः अभवन् ।

का अपि इच्छा

वन्दे मातरम्

कश्चित् सन्देशः ?

वन्दे मातरम्

उद्बन्धनरज्जुं प्रचुम्ब्य स्वयमेव कण्ठे धृतवान्

वन्दे मातरम्

कारागारिकः अन्ये अधिकारिणः तस्य समीपम् आगत्य स्थितवन्तः । खुदीरामः भूम्याः किञ्चिद् धूलिं स्वीकृत्य मुखे स्थापितवान् ।

"हे जननि ! हे जन्मभूमे ! तव ऋणं प्रत्यर्पयितुम् अहं न शक्तः । हे मातृभूमे ! मह्यं वरदानं देहि यत् पुनः पुनः अत्रैव जन्म प्राप्नुयाम् । प्रतिवारं तव मुक्त्यर्थं समर्पणं कुर्याम् ।"

खुदीरामः अन्तिमं प्रचण्डं च जयघोषं कृतवान् ।

वन्दे मातरम् ।

उच्चालनं भ्रान्तम् क्षणेनैव खुदीरामस्य शरीरं लम्बितम् अभवत् ।

खुदीरामः मातृभूमये समर्पितः

खुदीरामस्य नाम अमरहुतात्मानाम् इतिहासे अमरत्वं प्राप्नोत् । मृत्युदिनं पर्वदिनम् अभवत् । अमृत बाझार इति पत्रिकायां तस्य महती प्रशंसा जाता । सहस्रशः जनाः तस्य मृतदेहस्य दर्शनार्थं समायाताः । नरेन्द्रबाबुः नामकः अधिवक्ता तस्य दण्डनं न्यूनीकर्तुं प्रार्थितवान् आसीत् यत् पराधीनता इव रोगः जगति नान्यः । अतः सः रोगः निवारणीयः एव । खुदीरामः विस्फोटं कृत्वा पञ्चविंशतिः माइल परिमितं धावनं कृतवान् आसीत् । अभियोगः मासद्वयं चलितः । उद्बन्धदण्डनस्य प्राप्तेः अनन्तरं न्यायाधीशेन पृष्टं यत् किमपि प्रष्टुम् इच्छति वा ? इति तदवसरे सः अवदत् विस्फोटकानां निर्माणसम्बन्धे अहं किमपि वक्तुम् इच्छामि ।

सः कदापि प्राणरक्षणाय भिक्षां न अयाचत । खुदीरामस्य अन्तिमशब्दाः आसन् - वन्दे मातारम्

चिरोलः वेलेन्टाईनः लिखति यत् - बङ्गस्थानां राष्ट्रवादिनां कृते खुदीरामः हुतात्मा अनुकरणीयः च जातः । छात्राः अन्यजनाः च तस्य बलिदानमानार्थं विद्यालयान् महाविद्यालयान् आपणान् च पिधाय शोकम् आचरितवन्तः । तस्य छायाचित्राणि देशे वितरितानि । नवयुवकाः खुदीरामः इव धौतवस्त्रं धर्तुम् आरब्धवन्तः यस्मिन् च तस्य नाम - अङ्कितं स्यात् ।

●●●

प्रकरणम् - १३

हुतात्मनः कदापि न म्रियन्ते

११ अगस्त १९०८

खुदीरामस्य स्मशानयात्रायां भागं स्वीकर्तुं बङ्गस्य ग्रामाग्रामेभ्यः नगरनगरेभ्यः जनाः मुजफरपुरं समायाताः ।

यस्मिन् काले खुदीरामस्य मृतदेहः कारागृहात् बहिः आनीतः तदवसरे जनसम्मर्देन प्रचण्डगर्जनं कृतम् । वन्दे मातरम्

जीयात् खुदीरामः, जीयात् प्रफुल्लचन्द्र :

शतशः पुष्पहारैः तस्य देहः आवृतः । पूर्णसम्मानसहितं तस्य सम्मानयात्रा प्रस्थिता । सर्वेषाम् एक एव स्वरः आसीत् खुदीरामः शाश्वतं जीव्यात् बङ्गस्य सर्वेभ्यः कोणेभ्यः देशनेतारः अन्तिमयात्रायाम् उपस्थिताः आसन् । चन्दनकाष्ठैः चिता निर्मिता हुतात्मनः शरीरं तस्य उपरि स्थापितम् । गीतामन्त्रैः गगनं गुञ्जति स्म । पवित्रदेहः अग्निना लिप्तः । पवनः अपि यथा वन्दे मातरम् गायति स्म ।

खुदीरामः हुतात्मा अभवत् । धर्माय न्यायाय शीलाय चारित्र्यरक्षणाय देशाय प्राणत्यागकर्तृणां सङ्ख्या कियती ? एकस्य हुतात्मनः बलिदानेन शतशः हुतात्मनां जन्म भवति । खुदीरामस्य नवदशवर्षीयं पार्थिवं शरीरं पञ्चमहाभूतेषु सम्मिलितम् । जनाः खुदीरामस्य चितायाः भस्म स्वीकर्तुम् अपि धावितवन्तः । इत्यस्य उल्लेखः इतिहासे अस्ति । यत्र चिता प्रज्वलिता आसीत् तत्र हस्तपरिमितः गर्तः अभूत् ।

लोर्डकर्झनः सर्ववृत्तान्तं श्रुत्वा विषादग्रस्तः जातः । तस्य गुप्तगोष्ठ्यां तेन उक्तम् -

"हिन्दुस्तानस्य प्रजायाः प्राणाः जागृताः सन्ति अधुना । विचारैः सह युद्धकरणं दुष्करम् अस्ति । विचाराणां वधः न शक्यः । अस्माकं सैन्यं प्रक्षेपास्त्राणि च विचारैः सह योद्धुम् असमर्थानि । अहम् अङ्गीकरोति यत् हिन्दुस्तानस्य स्वातन्त्र्यस्य प्रभातम् ईदानीं प्रकटितम् एव ।"

कालिकातायं ढाकायां चित्तागोङ्गे मुजफरपुरे च तद्दिने गुप्तगोष्ठयः आयोजिताः । बहवः नवयुवकाः मातृभूमये जीवनपुष्पम् अर्पयितुं सन्नद्धाः ।

यत् बलिदानं खुदीरामप्रफुल्लाभ्यां दत्तं तत् बङ्गालेन कदापि न विस्मरिष्यते । द्वावपि मृत्वा अमरत्वं प्राप्तवन्तौ । भारतभूमिः इयं वीराणां जननी अस्ति ।

द्वौ अपि अल्पवयस्कौ, किशोरौ । नवदशवर्षीयौ द्वौ अपि किशोरौ यौवनप्रवेशात् पूर्वमेव गतवन्तौ । भाविवंशस्य किशोरेभ्यः बलिदानमिदं प्रेरणादायकं भविष्यति ।

द्वाभ्याम् उप्तः अयं क्रान्तिस्वरूपः पादपः अस्माभिः वर्धनीयः विस्तारणीयः चिरकालं यावत् स्मरणीयः च ।

•••

वन्दे मातरम्